प्र॰ ए॰ तेतिकीति-तेतेक्ति अतेतेकीत् अतेतेकिष्यत्

तिग-पूजायांच- लट् लिट् लुट् लुङ् लृङ्
प्र॰ ए॰ तिग्नोति तितेग तेगिता अतेगीत् अतेगिष्यत्

तृप-प्रीणने-लट् तृप्नोति-

तुद-व्यथने-शः

लट्

	प्र॰	म॰	उ॰
ए॰	तुदति	तुदसि	तुदामि
द्वि॰	तुदतः	तुदथः	तुदावः
ब॰	तुदन्ति	तुदथ	तुदामः

लिट्

	प्र॰	म॰	उ॰
ए॰	तुतोद	तुतोदिथ	तुतोद
द्वि॰	तुतुदतुः	तुतुदथुः	तुतुदिव
ब॰	तुतुदुः	तुतुद	तुतुदिम

लुट्

	प्र॰	म॰	उ॰
ए॰	तोत्ता	तोत्तासि	तोत्तास्मि
द्वि॰	तोत्तारौ	तोत्तास्थः	तोत्तास्वः
ब॰	तोत्तारः	तोत्तास्थ	तोत्तास्मः

लृट्

	प्र॰	म॰	उ॰
ए॰	तोत्स्यति	तोत्स्यसि	तोत्स्यामि
द्वि॰	तोत्स्यतः	तोत्स्यथः	तोत्स्यावः
ब॰	तोत्स्यन्ति	तोत्स्यथ	तोत्स्यामः

लोट्

	प्र॰	म॰	उ॰
ए॰	तुदतु–तुदतात्	तुद–तुदतात्	तुदानि
द्वि॰	तुदतां	तुदतं	तुदाव
ब॰	तुदन्तु	तुदत	तुदाम

लङ्

	प्र॰	म॰	उ॰
ए॰	अतुदत्	अतुदः	अतुदं
द्वि॰	अतुदतां	अतुदतं	अतुदाव
ब॰	अतुदन्	अतुदत	अतुदाम

विधिलिङ्

	प्र॰	म॰	उ॰
ए॰	तुदेत्	तुदेः	तुदेयं

विधिलिङ्

	प्र॰	म॰	उ॰
द्वि॰	तुदेतां	तुदेतं	तुदेव
ब॰	तुदेयुः	तुदेत	तुदेम

आशीर्लिङ्

	प्र॰	म॰	उ॰
ए॰	तुद्यात्	तुद्याः	तुद्यासं
द्वि॰	तुद्यास्तां	तुद्यास्तं	तुद्यास्व
ब॰	तुद्यासुः	तुद्यास्त	तुद्यास्म

लुङ्

	प्र॰	म॰	उ॰
ए॰	अतौत्सत्	अतौत्सीः	अतौत्सं
द्वि॰	अतौत्तां	अतौत्तं	अतौत्स्व
ब॰	अतौत्सुः	अतौत्त	अतौत्स्म

लृङ्

	प्र॰	म॰	उ॰
ए॰	अतोत्स्यत्	अतोत्स्यः	अतोत्स्यं
द्वि॰	अतोत्स्यतां	अतोत्स्यतं	अतोत्स्याव
ब॰	अतोत्स्यन्	अतोत्स्यत	अतोत्स्याम

तुद-धातोर्हेतुमण्णिच्-लट् लिट् लुट् लृट्

प्र॰ ए॰ तोदयति तोदयामास तोदयिता तोदयिष्यति

लोट् लङ् विधिलिङ्

प्र॰ ए॰ तोदयतु-तोदयतात् अतोदयत् तोदयेत्

आशीर्लिङ् लुङ् लृङ्

प्र॰ ए॰ तोद्यात् अतूतुदत् अतोदयिष्यत्

तुद-धातोस्सन्- लट् लुङ् लृङ्

प्र॰ ए॰ तुतुत्सति अतुतुत्सीत् अतुतुत्सिष्यत्

तुद-धातोर्यङ्- लट् लुङ् लृङ्

प्र॰ ए॰ तोतूद्यते अतोतुदिष्ट अतोतुदिष्यत

तुद-धातोर्यङ् लुक्-लट् लृङ्

प्र॰ ए॰ तोतुदीति-तोतोत्ति अतोतोदिष्यत्

त्वच-संवरणे- लट् लिट् लुट् लुङ्
प्र॰ ए॰ त्वचति तत्वाच त्वचिता अत्वचीत्–अत्वाचीत्
लृङ् अत्वाचिष्यत्

तृप-तृंफ-तृप्तौ-लट् तृपति–तृंफति

तुप-तुंफ-तुब-तुंभ-हिंसायां- लट्
प्र॰ ए॰ तुपति–तुंफति–तुंबति–तुंभति–
लिट् लुट्
प्र॰ ए॰ तुतोफ–तुतुंफ–तुतुंब–तुतुंभ तोपिता–तुंफिता–तोभिता
शेषंतुदधातुवत्– ·

तुण–कौटिल्ये-लट् तुणति लिट् तुतोण लुट् तोणिता

तृहू-तृंहू-हिंसार्थौ-लट् लिट् लुट्
प्र॰ ए॰ तृहति–तृंहति ततर्ह–ततृंह तर्हिता–तृंहिता

तिलस्नेहे- लट् लिट् लुट् लृट् लुङ् लृङ्
प्र॰ ए॰ तिलति तितेल तेलिता तेलिष्यति अतेलीत् अतेलिष्यत्

तृह-हिंसायां-तृणेढि- श्नम्
तंचू-संकोचने-तनक्ति-तंक्तः लट् लिट् लृङ्
प्र॰ ए॰ तंचति ततंच– अतंचिष्यत्
ततंचिथ
लुट् लुङ् ततंथ लृङ्
तंक्ता–तंचिता– अतंचीत्–अतांक्षीत्– अतंक्ष्यत्

तृणु-अदने- उ॰ लट् लिट् लुट् लृट् लोट्
प्र॰ ए॰ तृणोति ततर्ण तर्णिता तर्णिष्यति तृणोतु–तृणुतात्

तनुविस्तारे-लट्- तनोति–तनुतः द्वि॰
तन्वः–तनुवः–तन्मः–तनुमः–

लिट्- ततान–तेनतुः लुङ् अतानीत्
म॰
तुभ-हिंसायां-श्ना-लट् तुभ्नाति– तुभान

तंजि-हिंसाबलादाननिकेतनेषु-णिच्- लट् लुङ्
प्र॰ ए॰ तुंजयति अतुतुंजत्

तुज-इतिकेचित्- लट् लिट् लुङ् लृङ्
प्र॰ ए॰ तोजयति तोजयामास अतूतुजत् अतोजयिष्यत्

तड–आघाते– लट् लिट् लुङ् लृङ्
प्र॰ ए॰ ताडयति ताडयामास अतीतडत् अताडयिष्यत्

तल–प्रतिष्ठायां– लट् लिट् लुङ् लृङ्
प्र॰ ए॰ तालयति तालयांबभूव अतीतलत् अतालयिष्यत्

तुल–उन्माने– लट् लिट् लुङ् लृङ्
प्र॰ ए॰ तोलयति तोलयांचकार अतूतुलत् अतोलयिष्यत्

तिल–स्नेहने– लट् लिट् लुङ् लृङ्
प्र॰ ए॰ तेलयति तेलयामास अतीतिलत् अतेलयिष्यत्

तिज–निशाने–लट्– तेजयति–शेषंपूर्ववत्

तुबि–अर्दने–लट्– तुंबयति–अदर्शनइत्येके

तनु–श्रद्धोपहासनयोः– लट् लुङ् लृङ्
प्र॰ ए॰ तानयति अतीतनत् अतानयिष्यत्

इति परस्मैपदानि ।

अथ तकाराद्यात्मनेपदानि ।

त्रकि–गतौ– शप् लट्

	प्र॰	म॰	उ॰
ए॰	त्रंकते	त्रंकसे	त्रंके
द्वि॰	त्रंकेते	त्रंकेथे	त्रंकावहे
ब॰	त्रंकंते	त्रंकध्वे	त्रंकामहे

लिट्

	प्र॰	म॰	उ॰
ए॰	तत्रंके	तत्रंकिषे	तत्रंके
द्वि॰	तत्रंकाते	तत्रंकाथे	तत्रंकिवहे
ब॰	तत्रंकिरे	तत्रंकिध्वे	तत्रंकिमहे

लुट्

	प्र॰	म॰	उ॰
ए॰	त्रंकिता	त्रंकितासे	त्रंकिताहे
द्वि॰	त्रंकितारौ	त्रंकितासाथे	त्रंकितास्वहे
ब॰	त्रंकितारः	त्रंकिताध्वे	त्रंकितास्महे

लृट्

	प्र०	म०	उ०
ए०	त्रंकिष्यते	त्रंकिष्यसे	त्रंकिष्ये
द्वि०	त्रंकिष्येते	त्रंकिष्येथे	त्रंकिष्यावहे
ब०	त्रंकिष्यंते	त्रंकिष्यध्वे	त्रंकिष्यामहे

लोट्

	प्र०	म०	उ०
ए०	त्रंकतां	त्रंकस्व	त्रंकै
द्वि०	त्रंकेतां	त्रंकेथां	त्रंकावहै
ब०	त्रंकंतां	त्रंकध्वं	त्रंकामहै

लङ्

	प्र०	म०	उ०
ए०	अत्रंकत	अत्रंकथाः	अत्रंके
द्वि०	अत्रंकेतां	अत्रंकेथां	अत्रंकावहि
ब०	अत्रंकन्त	अत्रंकध्वं	अत्रंकामहि

विधिलिङ्

	प्र०	म०	उ०
ए०	त्रंकेत	त्रंकेथाः	त्रंकेय
द्वि०	त्रंकेयातां	त्रंकेयाथां	त्रंकेवहि
ब०	त्रंकेरन्	त्रंकेध्वं	त्रंकेमहि

आशीर्लिङ्

	प्र०	म०	उ०
ए०	त्रंकिषीष्ट	त्रंकिषीष्ठाः	त्रंकिषीय
द्वि०	त्रंकिषीयास्तां	त्रंकिषीयास्थां	त्रंकिषीवहि
ब०	त्रंकिषीरन्	त्रंकिषीढ्वं	त्रंकिषीमहि

लुङ्

	प्र०	म०	उ०
ए०	अत्रंकिष्ट	अत्रंकिष्ठाः	अत्रंकिषि
द्वि०	अत्रंकिषातां	अत्रंकिषाथां	अत्रंकिष्वहि
ब०	अत्रंकिषत	अत्रंकिढ्वं	अत्रंकिष्महि

लृङ्

	प्र०	म०	उ०
ए०	अत्रंकिष्यत	अत्रंकिष्यथाः	अत्रंकिष्ये

लङ्

	प्र॰	म॰	उ॰
द्वि॰	अत्रंक्रिष्येतां	अत्रंक्रिष्येथां	अत्रंक्रिष्यावहि
ब॰	अत्रंक्रिष्यन्त	अत्रंक्रिष्यध्वं	अत्रंक्रिष्यामहि

त्रकि-धातोर्हेतुमण्णिच् लट् लङ्

प्र॰ ए॰ त्रंकयते अतत्रंकत

त्रकि-धातोस्सन् लट् लङ्

प्र॰ ए॰ तित्रंकिषते अतित्रंकिषिष्ट

त्रकि-धातोर्यङ् लट् लङ्

प्र॰ ए॰ तात्रंक्यते अतात्रंकिष्ट

त्रकि-धातोर्यङ् लुक् लट् लङ्

प्र॰ ए॰ तात्रंकीति-तात्रंक्ति अतात्रंकीत्

त्रौक्-गत्यर्थः । लट् लिट् लुट् लोट् लङ्

प्र॰ ए॰ त्रौकते तुत्रौके त्रौकिता त्रौकतां अत्रौकत

विधिलिङ् आशीर्लिङ् लुङ् लृङ्

प्र॰ ए॰ त्रौकेत त्रौकिषीष्ट अत्रौकिष्ट अत्रौकिष्यत

तिक्-गत्यर्थाः- लट् लिट् लुट् लृट् लोट्

प्र॰ ए॰ तेकते तितिके तेकिता तेकिष्यते तेकतां

लङ् विधिलिङ् आशीर्लिङ् लुङ् लृङ्

प्र॰ ए॰ अतेकत तेकेत तेकिषीष्ट अतेकिष्ट अतेकिष्यत

तीक्-गत्यर्थः लट्- तीकते-शेषंचीवृधातुवत्-

तुडि-तोडने- लट्- तुंडते-शेषंकुडिधातुवत्

तडि-ताडने लट्- तुंडते-शेषंचडिधातुवत्

तिपृ-क्षरणार्थः । लट्- तेपते-शेषंतिक्धातुवत्

तेपृ-क्षरणार्थः । लट्- तेपते-शेषंगेपृधातुवत्

तेपृ-कंपनेच- लट्- तेपते-शेषंपूर्ववत्

त्रपूष्-लज्जायां- लट्- त्रपते-शेषंक्षमूषधातुवत्

तयगतौ- लट्- तयते-शेषंवयधातुवत्

तायृ-संतानपालनयोः लट्- तायते-शेषंचायृवत्

तेवृ-देवने- तेवते-शेषंकेवृधातुवत्

तुभ-हिंसायां-	लट्	लिट्	लुट्	लृट्	लोट्
प्र० ए०	तोभते	तुतुभे	तोभिता	तोभिष्यते	तोभतां

	लङ्	विधिलिङ्	आशीर्लिङ्	लुङ्	लृङ्
प्र० ए०	अतोभत	तोभेत	तोभिषीष्ट	अतोभिष्ट	अतोभिष्यत

ञित्वरा-संभ्रमे-लट्- त्वरते-शेषञित्विधातुवत्

त्रैङ्-पालने-	लट्	लिट्	लुट्	लृट्	लुङ्	लृङ्
प्र० ए०	त्रायते	तत्रे	त्राता	त्रास्यते	अत्रास्त	अत्रास्यत्

तिज-निशातने	लट्	लिट्
प्र० ए०	तेजते	तितिजे

तिजधातोर्णिच् लट्- तेजयति-तेजयते

तिजेः-क्षमायांसन् लट् तितिक्षते

तिजधातोर्यङ् लट् तेतिज्यते

तिजधातोर्यङ् लुक् लट्- तेतिजीति-तेतिक्ति-इतिशप्

तूरी-गतित्वरण-हिंसनयोः-	श्यन् लट्	लिट्	लुङ्	लृङ्
प्र० ए०	तूर्यते	तुतूरे	अतूरिष्ट	अतूरिष्यत

तप-ऐश्वर्येवा	लट्	लिट्	लुङ्	लृङ्
प्र० ए०	तपते	तेपे	अतप्त	अतूरिष्यत

उ-तृदिर्-हिंसानादयोः श्नम् तृन्ते-तृणेढि-तृह्यात् अतर्हीत् तृत्तः ततर्ह-तर्हिता-अतृणेट्

अथस्वार्थेणिच्

तत्रि-कुटुंबधारणे-	लट्	लुङ्	लृङ्
प्र० ए०	तंत्रयते	अततंत्रत	अतंत्रयिष्यत

तर्ज-तर्जने-	लट्	लिट्	लुङ्	लृङ्
प्र० ए०	तर्जयते	तर्जयांचक्रे	अततर्जत	अतर्जयिष्यत
तूण-पूरणे-	तूणयते	तूणयांचक्रे	अतुतूणत	अतूणयिष्यत
तुट-भेदने-	तर्टयते	तर्टयांचक्रे		

तसि-अलंकारे-	लट्	लिट्	लुट्	लृट्
प्र० ए०	तंसयते	तंसयांचक्रे	तंसयिता	तंसयिष्यते

त्रस-धारणे- लट् लोट् लङ् विधिलिङ्
प्र॰ ए॰ त्रासयते त्रासयतां अत्रासयता त्रासयेत

तुजि-भाषार्थः लट् आशीर्लिङ् लुङ्
प्र॰ ए॰ तुंजयते तुंजयिषीष्ट अतुतुंजत

त्रसि-भाषार्थः- लट् लङ्
प्र॰ ए॰ त्रंसयते अत्रंसयिष्यत-इत्याद्यूह्यं

तर्क भाषार्थः लट्- तर्कयते

तडि-भाषार्थः लट्- तंडयते

तप-दाहे- लट्- तापयते

तृप-तृप्तौ- लट्- तर्पयते

तनु-श्रद्धोपकरणयोः तानयते

तीर-कर्मसमाप्तौ- तीरयते

तुत्थ-आवरणे- तुत्थयते

कंड्वादि-तंतस् दुःखे-तुरणत्वरायां-तिरस्-अतर्द्धौ तरण-गतौ-

इति तकारादिआत्मनेपदं ।

अथ दकाराद्यात्मनेपदानि ।

दद-दाने-शप्- लट्

	प्र॰	म॰	उ॰
ए॰	ददते	ददसे	ददे
द्वि॰	ददेते	ददेथे	ददावहे
ब॰	ददन्ते	ददध्वे	ददामहे

लिट्

	प्र॰	म॰	उ॰
ए॰	दददे	ददंदिषे	ददंदे
द्वि॰	दददाते	दददाथे	ददंदिवहे
ब॰	ददंदिरे	दददिध्वे	ददंदिमहे

लुट्

	प्र॰	म॰	उ॰
ए॰	ददिता	ददितासे	ददिताहे
द्वि॰	ददितारौ	ददितासाथे	ददितास्वहे
ब॰	ददितारः	ददिताध्वे	ददितास्महे

लृट्

	प्र.	म.	उ.
ए.	ददिष्यते	ददिष्यसे	ददिष्ये
द्वि.	ददिष्येते	ददिष्येथे	ददिष्यावहे
ब.	ददिष्यन्ते	ददिष्यध्वे	ददिष्यामहे

लोट्

	प्र.	म.	उ.
ए.	ददतां	ददस्व	ददै
द्वि.	ददेतां	ददेथां	ददावहै
ब.	ददन्तां	ददध्वं	ददामहै

लङ्

	प्र.	म.	उ.
ए.	अददत	अददथाः	अददे
द्वि.	अददेतां	अददेथां	अददावहि
ब.	अददन्त	अददध्वं	अददामहि

विधिलिङ्

	प्र.	म.	उ.
ए.	ददेत	ददेथाः	ददेयं
द्वि.	ददेयातां	ददेयाथां	ददेवहि
ब.	ददेरन्	ददेध्वं	ददेमहि

आशीर्लिङ्

	प्र.	म.	उ.
ए.	ददिषीष्ट	ददिषीष्ठाः	ददिषीय
द्वि.	ददिषीयास्तां	ददिषीयास्थां	ददिषीवहि
ब.	ददिषीरन्	ददिषीढ्वं	ददिषीमहि

लुङ्

	प्र.	म.	उ.
ए.	अददिष्ट	अददिष्ठाः	अददिषि
द्वि.	अददिषातां	अददिषाथां	अददिष्वहि
ब.	अददिषत	अददिध्वं	अददिष्महि

लृङ्

	प्र.	म.	उ.
ए.	अददिष्यत	अददिष्यथाः	अददिष्ये

लङ्

	प्र.	म.	उ.
द्वि.	अदिदिष्येतां	अदिदिष्येथां	अदिदिष्यावहि
ब.	अदिदिष्यन्त	अदिदिष्यध्वं	अदिदिष्यामहि

दध-धारणे लट् लिट्
प्र. ए. दधते देधे-देधाते-देधिरे

द्रेक्ट-शब्दोत्साहयोः-द्रेकते-शेषंतेपृवत्
द्राघृ-सामर्थ्ये समवाये द्राघते-तायृधातुवत्
द्राडृ-विशरणे-द्राडते-शेषंपूर्ववत्-
दय-दानगतिहिंसारक्षणदानेषु-दयते

लिट्

	प्र.	म.	उ.
ए.	दयांचक्रे	दयांचकृषे	दयांचक्रे
द्वि.	दयांचक्राते	दयांचक्राथे	दयांचकृवहे
ब.	दयांचक्रिरे	दयांचकृध्वे	दयांचकृमहे

लुट् दयिता-शेषंतयधातुवत्

देवृ-देवने-लट् देवते शेषं तेपृधातुवत्
दक्ष-वृद्धौ-शीघ्रार्थेच-दक्षते-ददक्षे-शेषंक्रत्यधातुवत्
दीक्ष-मौञ्जेज्योपनयननियमव्रतादेशेषु-दीक्षते शेषंपूर्ववत्
द्राहृ-निद्राक्षये-द्राहते-द्राघृधातुवत्-विक्षेपइत्येके

द्युत-दीप्तौ लट्

	प्र.	म.	उ.
ए.	द्योतते	द्योतसे	द्योते
द्वि.	द्योतेते	द्योतेथे	द्योतावहे
ब.	द्योतन्ते	द्योतध्वे	द्योतामहे

लिट्

	प्र.	म.	उ.
ए.	दिद्युते	दिद्युतिषे	दिद्युते
द्वि	दिद्युताते	दिद्युताथे	दिद्युतिवहे
ब.	दिद्युतिरे	दिद्युतिध्वे	दिद्युतिमहे

लुट्

	प्र॰	म॰	उ॰
ए॰	द्योतिता	द्योतितासे	द्योतिताहे
द्वि॰	द्योतितारौ	द्योतितासाथे	द्योतितास्वहे
ब॰	द्योतितारः	द्योतिताध्वे	द्योतितास्महे

लृट्

	प्र॰	म॰	उ॰
ए॰	द्योतिष्यते	द्योतिष्यसे	द्योतिष्ये
द्वि॰	द्योतिष्येते	द्योतिष्येथे	द्योतिष्यावहे
ब॰	द्योतिष्यन्ते	द्योतिष्यध्वे	द्योतिष्यामहे

लोट्

	प्र॰	म॰	उ॰
ए॰	द्योततां	द्योतस्व	द्योतै
द्वि॰	द्योतेतां	द्योतेथां	द्योतावहै
	द्योतन्तां	द्योतध्वं	द्योतामहै

लङ्

	प्र॰	म॰	उ॰
ए॰	अद्योतत	अद्योतथाः	अद्योते
द्वि॰	अद्योतेतां	अद्योतेथां	अद्योतावहि
ब॰	अद्योतध्वं	अद्योतध्वं	अद्योतामहि

विधिलिङ्

	प्र॰	म॰	उ॰
ए॰	द्योतेत	द्योतेथाः	द्योतेय
द्वि॰	द्योतेयातां	द्योतेयाथां	द्योतेवहि
ब॰	द्योतेरन्	द्योतेध्वं	द्योतेमहि

आशीर्लिङ्

	प्र॰	म॰	उ॰
ए॰	द्योतिशीष्ट	द्योतिषीष्ठाः	द्योतिषीय
द्वि॰	द्योतिषीयास्तां	द्योतिषीयास्थां	द्योतिषीवहि
ब॰	द्योतिषीरन्	द्योतिषीध्वं	द्योतिषीमहि

लुङ्

	प्र॰	म॰
ए॰	अद्योतिष्ट–अद्युतत्	अद्योतिष्ठाः–अद्युतः

लुङ्

	प्र०	म०
द्वि०	अद्योतिषातां-अद्युततां	अद्योतिषाथां-अद्युततं
ब०	अद्योतिषत-अद्युतन्	अद्योतिध्वं-अद्युतत

उत्तम

ए०	अद्योतिषि-अद्युतं
द्वि०	अद्योतिष्वहि-अद्युताव
ब०	अद्योतिष्महि-अद्युताम

लृङ्

	प्र०	म०	उ०
ए०	अद्योतिष्यत	अद्योतिष्यथाः	अद्योतिष्ये
द्वि०	अद्योतिष्येतां	अद्योतिष्येथां	अद्योतिष्यावहि
ब०	अद्योतिष्यन्त	अद्योतिष्यध्वं	अद्योतिष्यामहि

दक्ष-वृद्धौ-शीघ्रार्थेच-लट् लिट्

प्र० ए० दक्षते ददक्षे शेषंघट्टवत्

उदाश्ट-दाने-लट् दाशते शेषंकाशृधातुवत्

दाम्ट-दाने-लट् दाशति-दासते-दासति-शेषंपूर्ववत्

देङ्-रक्षणे- लट् लिट्

प्र० ए० दयते दिग्ये दिग्याते दिग्यिरे

दीधीङ्-दीप्ति देवनयोः लुक् लट्

	प्र०	म०	उ०
ए०	दीधीते	दीधीषे	दीध्ये
द्वि०	दीध्याते	दीध्याथे	दीधीवहे
ब०	दीध्यते	दीधीध्वे	दीधीमहे

	लिट्	लुट्	लृट्	लोट्	लङ्
प्र० ए०	दीध्यांचक्रे	दीधिता	दीधिष्यते	दीधीतां	अदीधीत

	विधिलिङ्	आशीर्लिङ्	लुङ्	लृङ्
प्र० ए०	दीधीत	दीधिषीष्ट	अदीधिष्ट	अदीधिष्यत

दूङ्-परितापे-श्यन् लट् लिट्

प्र० ए० दूयते दुदूये

दीङ्-क्षये-दीयते-दीदीये-दाता-दास्यते-अदास्त

दीप्-दीप्तौ- लट् लिट् लुङ् लृङ्

प्र० ए० दीप्यते दीदीपे अदीपि-अदीपिष्ट अदीपिष्यत

इति दकारादिआत्मनेपदानि।

अथ दकारादिपरस्मैपदानि ।

धीङ्-आधारे-धीयते-दिध्ये देता
धूरी-हिंसागत्योः-धूर्यते-दुधूरे
दृङ आदरे-शः आद्रियते-आदद्रे-आदद्रांचक्रे आदरिष्यत
धृञ्-हिंसायां-श्ना-धृणीते-धृणाति
धूञ्-कंपने-धूनीते-धूनाति-

दाम-दाने-

	लट्	लिट्	लुङ्	लृङ्
प्र० ए०	दामयते	दामयांचक्रे	अदीदमत	अदमयिष्यत

दशिदंशने-

	लट्	लुङ्	लृङ्
प्र० ए०	दंशयते	अददंशत	अदंशयिष्यत

दसि-दंशनदर्शनयोः-दंसयते-दंसेत्येके

दिवु-परिपूजने-

	लट्	लिट्	लुङ्	लृङ्
प्र० ए०	दिवयते	दिवयांचक्रे	अदीदिवत	अदीवयिष्यत

दिवु-मर्दने-दिवयते-शेषंपूर्ववत्

दल-विदारणे-

	लट्	लिट्	लुङ्	लृङ्
प्र० ए०	दालयते	दालयांचक्रे	अदीदलत	अदालयिष्यत

दशिदसिच-भाषार्थः दंशयते-दंसयते-

दृप-संदीपनइत्येके

	लट्	लिट्
प्र० ए०	दर्पयते	दर्पयांचक्रे

दृभ-भये-लट्- दर्भयते दर्भयांचक्रे
दृभु-संदर्भे-लट्- दर्भयते
दृप-प्रसहने-लट्- दर्पयते

दंड-दंडनिपातेने-

	लट्	लिट्	लुङ्
प्र० ए०	दंडयते	दंडयांचक्रे	अदिदंडत

दुःखतत्क्रियायां-

	लट्	लिट्	लुङ्
प्र० ए०	दुःखयते	दुःखयांचक्रे	अदुदुःखत

द्राख-शोषणालमर्थयोः शप्

लट्

	प्र०	म०	उ०
ए०	द्राखति	द्राखसि	द्राखामि
द्वि०	द्राखतः	द्राखथः	द्राखावः
ब०	द्राखन्ति	द्राखथ	द्राखामः

लिट्

	प्र॰	म॰	उ॰
ए॰	दद्राख	दद्राखिथ	दद्राख
द्वि॰	दद्राखतुः	दद्राखथुः	दद्राखिव
ब॰	दद्राखुः	दद्राख	दद्राखिम

लुट्

	प्र॰	म॰	उ॰
ए॰	द्राखिता	द्राखितासि	द्राखितास्मि
द्वि॰	द्राखितारौ	द्राखितास्थः	द्राखितास्वः
ब॰	द्राखितारः	द्राखितास्थ	द्राखितास्मः

लृट्

	प्र॰	म॰	उ॰
ए॰	द्राखिष्यति	द्राखिष्यसि	द्राखिष्यामि
द्वि॰	द्राखिष्यतः	द्राखिष्यथः	द्राखिष्यावः
ब॰	द्राखिष्यन्ति	द्राखिष्यथ	द्राखिष्यामः

लोट्

	प्र॰	म॰	उ॰
ए॰	द्राखतु–द्राखतात्	द्राख–द्राखतात	द्राखानि
द्वि॰	द्राखतां	द्राखतं	द्राखाव
ब॰	द्राखन्तु	द्राखत	द्राखाम

लङ्

	प्र॰	म॰	उ॰
ए॰	अद्राखत्	अद्राखः	अद्राखं
द्वि॰	अद्राखतां	अद्राखतं	अद्राखाव
ब॰	अद्राखन्	अद्राखत	अद्राखाम

विधिलिङ्

	प्र॰	म॰	उ॰
ए॰	द्राखेत्	द्राखेः	द्राखेयं
द्वि॰	द्राखेतां	द्राखेतं	द्राखेव
ब॰	द्राखेयुः	द्राखेत	द्राखेम

आशीर्लिङ्

	प्र॰	म॰	उ॰
ए॰	द्राख्यात्	द्राख्याः	द्राख्यासं

आशीर्लिङ्

	प्र०	म०	उ०
द्वि०	द्राख्यास्तां	द्राख्यास्तं	द्राख्यास्व
ब०	द्राख्यासुः	द्राख्यास्त	द्राख्यास्म

लुङ्

	प्र०	म०	उ०
ए०	अद्राखीत्	अद्राखीः	अद्राखिषं
द्वि०	अद्राखिष्टां	अद्राखिष्टं	अद्राखिष्व
ब०	अद्राखिषुः	अद्राखिष्ट	अद्राखिष्म

लृङ्

	प्र०	म०	उ०
ए०	अद्राखिष्यत्	अद्राखिष्यः	अद्राखिष्यं
द्वि०	अद्राखिष्यतां	अद्राखिष्यतं	अद्राखिष्याव
ब०	अद्राखिष्यन्	अद्राखिष्यत	अद्राखिष्याम

द्राख-ढाहेर्हेतुमण्णिच् लट् सन्
प्र० ए० द्राखयति-द्राखयते दिद्राखिषति-
यङ् यङ् लुक्
प्र० ए० दाद्राख्यते दाद्राखीति-दाद्राक्ति

दघि-पालने- लट् लिट् लुट् लृट् लोट्
प्र० ए० दंघति- ददंघ दंघिता दंघिष्यति दंघतु-दंघतात्
लङ् विधिलिङ् आशीर्लिङ् लुङ् लृङ्
प्र० ए० अदंघत् दंघेत दंघ्यात् अदंघीत् अदंघिष्यत्

द्रण-शब्दार्थः- लट् लिट् लुङ् लृङ्
प्र० प्र० द्रणति दद्राण अद्राणीत् अद्रणिष्यत्

द्रम-गतौ- लट् हेतुमण्णिच् सन् यङ् यङ् लुक्
प्र० ए० द्रमति द्रमयति दिद्रमिषति दंद्रम्यते दंद्रमीति-दद्रन्ति

दश-विशरणे लट् हेतुमण्णिच् सन्
प्र० ए० दशति दाशयति-दाशयते दिदशिषति
यङ् यङ् लुक्
प्र० ए० दादश्यते दादशीति-दादष्टि

दुर्वी-हिंसार्थः- लट् हेतुमण्णिच् सन्
प्र० ए० दूर्वति दूर्वयति-दूर्वयते दुदूर्विषति
यङ् यङ् लुक्
प्र० ए० दोदूर्व्यते दोदूर्वीति-दोदूर्ति

दिवि-प्रीणनार्थे लट् हेतुमणिणच् सन्
प्र· ए· दिन्वति दिन्वयति-दिन्वयते दिदिन्विषति
यङ् यङ् लुक्
प्र· ए· देदिन्व्यते देदिन्वीति-देदिन्ति

द्राक्षि-घोरवासितेच-लट् हेतुमणिणच् सन्
प्र· ए· द्राक्षति द्राक्षयति-द्राक्षयते दिद्राङ्क्षिषति
यङ् यङ् लुक्
प्र· ए· दाद्राङ्क्ष्यते दाद्राक्षीति-दाद्राष्टि

दृह-दृहि वृद्धौ- लट् हेतुमणिणच् सन्
प्र· ए· दर्हति- दर्हयति-दर्हयते दिदर्हिषति
दृंहति- दृंहयति-दृंहयते दिदृंहिषति
यङ् यङ् लुक्
प्र· ए· दरीदृह्यते दरिदृहीति-दरीदर्धि
दरीदृंह्यते दरिदृंहीति-दरीदृंढि

दुहिर्-अर्दने- लट् हेतुमणिणच् सन्
प्र· ए· दोहति दोहयति-दोहयते दुदोहिषति-दुदुहिषति
यङ् यङ् लुक्
प्र· ए· दोदुह्यते- दोदुहीति-दोदोग्धि-

दॄ-भये- लट् हेतुमणिणच् सन् यङ्
प्र· ए· दरति- दारयति-दारयते दिदीर्षति दादीर्यते
यङ् लुक् दादरीति-दादर्ति

दाशृ-दाने- लट् हेतुमणिणच् सन् यङ्
प्र· ए· दाशति दाशयति-दाशयते दिदाशिषति दादाश्यते
यङ् लुक्- दादाशीति-दादाष्टि-

दै-न्यक्करणे- लट् हेतुमणिणच् सन् यङ्
प्र· ए· द्रायति द्रापयति-द्रापयते दिद्रासति दाद्रायते
यङ् लुक्- दाद्रेति-दाद्राति-

द्रै-स्वप्ने-लट् द्रायति-शेषंपूर्ववत्

दैप्-शोधने- लट् लुङ् हेतुमणिणच् सन्
प्र· ए· दायति- अदासीत् दापयति-दापयते दिदासति
यङ् यङ् लुक्
प्र· ए· दादायते- दादेति-दादाति-

दाण्–दाने– लट् हेतुमण्णिच् सन् यङ्
प्र॰ ए॰ यच्छति दापयति–दापयते दित्सति देदीयते
यङ् लुक्– देदेति–दादाति–

ह्वृ–ह्वर्चने– लट् हेतुमण्णिच् सन् यङ्
प्र॰ ए॰ ह्वरति ह्वारयति–ह्वारयते– दिह्वृषति ह्वाह्वर्यते
यङ् लुक्– दर्ह्वरीति–दरिह्वर्ति–दरीह्वर्ति–दरीह्वरीति–

द्रु–द्रुगतौ लट् हेतुमण्णिच्
प्र॰ ए॰ दवति–द्रवति दावयति–दावयते–द्रावयति–द्रावयते

सन् यङ्
प्र॰ ए॰ दुदूषति–दुद्रूषति दोदूयते–दोद्रूयते

यङ् लुक् णिच् लुङ्
प्र॰ ए॰ दोदवीति–दोदोति अदिद्रवत्–अदुद्रवत्

दृशिर्–प्रेक्षणे–

लट्

	प्र॰	म॰	उ॰
ए॰	पश्यति	पश्यसि	पश्यामि
द्वि॰	पश्यतः	पश्यथः	पश्यावः
ब॰	पश्यन्ति	पश्यथ	पश्यामः

लिट्

	प्र॰	म॰	उ॰
ए॰	ददर्श	दद्रष्ठ–ददर्शिथ	ददर्श
द्वि॰	ददृशतुः	ददृशथुः	ददृशिव
ब॰	ददृशुः	ददृश	ददृशिम

लुट्

	प्र॰	म॰	उ॰
ए॰	द्रष्टा	द्रष्टासि	द्रष्टास्मि
द्वि॰	द्रष्टारौ	द्रष्टास्थः	द्रष्टास्वः
ब॰	द्रष्टारः	द्रष्टास्थ	द्रष्टास्मः

लृट्

	प्र॰	म॰	उ॰
ए॰	द्रक्ष्यति	द्रक्ष्यसि	द्रक्ष्यामि
द्वि॰	द्रक्ष्यतः	द्रक्ष्यथः	द्रक्ष्यावः
ब॰	द्रक्ष्यन्ति	द्रक्ष्यथ	द्रक्ष्यामः

लोट्

	प्र०	म०	उ०
ए०	पश्यतु—पश्यतात्	पश्य—पश्यतात्	पश्यानि
द्वि०	पश्यतां	पश्यतं	पश्याव
ब०	पश्यन्तु	पश्यत	पश्याम

लङ्

	प्र०	म०	उ०
ए०	अपश्यत्	अपश्यः	अपश्यं
द्वि०	अपश्यतां	अपश्यतं	अपश्याव
ब०	अपश्यन्	अपश्यत	अपश्याम

विधिलिङ्

	प्र०	म०	उ०
ए०	पश्येत्	पश्येः	पश्येयं
द्वि०	पश्येतां	पश्येतं	पश्येव
ब०	पश्येयुः	पश्येत	पश्येम

आशीर्लिङ्

	प्र०	म०	उ०
ए०	दृश्यात्	दृश्याः	दृश्यासं
द्वि०	दृश्यास्तां	दृश्यास्तं	दृश्यास्व
ब०	दृश्यासुः	दृश्यास्त	दृश्यास्म

लुङ्

	प्र०	म०	उ०
ए०	अदर्शत्—अद्राक्षीत्	अदर्शः—अद्राक्षीः	अदर्शं—अद्राक्षं
द्वि०	अदर्शतां—अद्राष्टां	अदर्शतं—अद्राक्षिष्टं	अदर्शव—अद्राक्ष्व
ब०	अदर्शन्—अद्राक्षुः	अदर्शत—अद्राक्षिष्ट	अदर्शम—अद्राक्ष्म

लृङ्

	प्र०	म०	उ०
ए०	अद्रक्ष्यत्	अद्रक्ष्यः	अद्रक्ष्यं
द्वि०	अद्रक्ष्यतां	अद्रक्ष्यतं	अद्रक्ष्याव
ब०	अद्रक्ष्यन्	अद्रक्ष्यत	अद्रक्ष्याम

दृशिर्-धातोर्हेतुमणिणच्-लट् — लुट् — लुट्

	लट्	लिट्	लुट्
प्र० ए०	दर्शयति—दर्शयते	दर्शयामास	दर्शयितासि
		दर्शयांचक्रे	दर्शयितासे

लृट् लोट्
प्र· ए· दर्मयिष्यति-दर्मयिष्यते दर्मयतां-दर्मयतु-दर्मयतात्
लङ् विधिलिङ् आशीर्लिङ्
प्र· ए· अदर्मयतु-अदर्मयत- दर्मयेत्-दर्मयेत दर्म्यात्-दर्मयिषीष्ट
लुङ् लृङ्
प्र· ए· अददर्मत्-अददर्मत- अदर्मयिष्यत्-अदर्मयिष्यत

दृशिर्-धातोस्सन्- लट् लिट् लुट् लृट्
प्र· ए· दिदृक्षति दिदृक्षामास दिदृक्षिता दिदृक्षिष्यति
लोट् लङ् विधिलिङ् आशीर्लिङ्
प्र· ए· दिदृक्षतु अदिदृक्षत् दिदृक्षेत् दिदृक्ष्यात्
लुङ् लृङ्
प्र· ए· अदिदृक्षीत् अदिदृक्षिष्यत्

दृशिर्-धातोर्यङ्- लट् लिट् लुट् लृट्
प्र· ए· दरदृश्यते दरदृशांचक्रे दरदृशिता दरदृशिष्यते
लोट् लङ् विधिलिङ् आशीर्लिङ्
प्र· ए· दरदृश्यतां अदरदृश्यत दरदृश्येत दरदृशिषीष्ट
लुङ् लृङ्
प्र· ए· अदरदृशिष्ट अदरदृशिष्यत-

दृशिर्-धातोर्यङ् लुक्-लट् लिट् लुट्
प्र· ए· दरीदृशीति दरीदर्शामास दरीदर्शिता
लृट् लोट् लङ्
प्र· ए· दरीदर्शिष्यति दरीदर्शिमदृष्टात् अदरीदर्शीत्-अदरीदरत्
विधिलिङ् आशीर्लिङ् लुङ् लृङ्
प्र· ए· दरीदृश्यात् दरीदृश्यात् अदरीदृशीत् अदरीदर्शिष्यत्

दंश-दशने-दशनुदंष्ट्राव्यापारः- लट् लिट् लुट् लृट्
प्र· ए· दशति ददंश दंष्टा दंक्ष्यति
लोट् लङ् विधिलिङ् आशीर्लिङ् लुङ् लृङ्
प्र· ए· दशतु-दशतात् अदशत् दशेत् दश्यात् अदांक्षीत् अदङ्क्ष्यत्

दंश-धातोर्हेतुमण्णिच्- लट् सन् यङ् यङ् लुक्
प्र· ए· दंशयति दिदंशिषति ददश्यते दंदंशीति-दंदंष्टि

दह-भस्मीकरणे- लट्

	प्र·	म·	उ·
ए·	दहति	दहसि	दहामि

लिट्

	प्र०	म०	उ०
ए०	ददाह	देहिथ-दत्थ	ददाह-ददह
द्वि०	देहतुः	देहथुः	देहिव-
ब०	देहुः	देह	देहिम

लुट्

	प्र०	म०	उ०
ए०	दग्धा	दग्धासि	दग्धास्मि

लृट्

	प्र०	म०	उ०
ए०	धक्ष्यति	धक्ष्यसि	धक्ष्यामि

लोट्

	प्र०	म०	उ०
ए०	दहतु-दहतात्	दह-दहतात्	दहानि

	लङ्	विधिलिङ्	आशीर्लिङ्
प्र० ए०	अदहत्	दहेत्	दह्यात्

लुङ्

	प्र०	म०	उ०
ए०	अधाक्षीत्	अधाक्षीः	अधाक्षं
द्वि०	अदाग्धां	अदाग्धं	अधाक्ष्व
ब०	अधाक्षुः	अदाग्ध	अधाक्ष्म

लृङ्

	प्र०	म०	उ०
ए०	अधक्ष्यत्	अधक्ष्यः	अधक्ष्यं

दह-धातोर्हेतुमण्णिच्-	लट्	लुङ्	लृङ्
	प्र० ए० दाहयति	अदीदहत्	अदाहयिष्यत्

दह-धातोस्सन्	लट्	यङ्	यङ् लुक् लट्
	प्र० ए० दिधक्षति	दंदह्यते	दंदहीती-दंदग्धि

दान-खंडने-उ० आर्जवेकेचित् लट्

	प्र०	म०	उ०
ए०	दीदांसति-दीदांससि	दीदांससि	दीदांसामि
द्वि०	दीदांसतः	दीदांसथः	दीदांसावः
ब०	दीदांसन्ति	दीदांसथ	दीदांसामः

लिट्

	प्र॰	म॰	उ॰
ए॰	दीदांसांचकार	दीदांसांचकर्थ	दीदांसांचकार–दीदांसांचकर

लुट्

	प्र॰	म॰	उ॰
ए॰	दीदांसिता	दीदांसितासि	दीदांसितास्मि

लृट्

	प्र॰	म॰	उ॰
ए॰	दीदांसिष्यति	दीदांसिष्यसि	दीदांसिष्यामि

लोट्

	प्र॰	म॰	उ॰
ए॰	दीदांसतु–दीदांसतात्	दीदांस–दीदांसतात्	दीदांसानि

लङ्

	प्र॰	म॰	उ॰
ए॰	अदीदांसत्	अदीदांसः	अदीदांसं

विधिलिङ्

	प्र॰	म॰	उ॰
ए॰	दीदांसेत्	दीदांसेः	दीदांसेयं

आशीर्लिङ्

	प्र॰	म॰	उ॰
ए॰	दीदांस्यात्	दीदांस्याः	दीदांस्यासं

लुङ्

	प्र॰	म॰	उ॰
ए॰	अदीदांसीत्	अदीदांसीः	अदीदांसिषं

लृङ्

	प्र॰	म॰	उ॰
ए॰	अदीदांसिष्यत्	अदीदांसिष्यः	अदीदांसिष्यं

दानधातोर्हेतुमणिणच्–लट् — लिट् — लुट्

प्र॰ ए॰ दीदांसयति–दीदांसयते– दीदांसयांचकार दीदांसयिता

लृट् — लोट्

प्र॰ ए॰ दीदांसयिष्यति–दीदांसयिष्यते दीदांसयतु–दीदांसयतां

लङ् — विधिलिङ् — आशीर्लिङ्

प्र॰ ए॰ अदीदांसयत्–अदीदांसयत दीदांसयेत् दीदांस्यात्

लुङ् — लृङ्

प्र॰ ए॰ अदीदांसत् अदीदांसयिष्यत्–अदीदांसयिष्यत

दान-धातोस्सन्- लट् लिट् लुट्
प्र॰ ए॰ दीदांसिषति दीदांसिषामास दीदांसिषिता
लृट् लोट् लङ्
प्र॰ ए॰ दीदांसिषिष्यति दीदांसिषतु अदीदांसिषत्
विधिलिङ् आशीर्लिङ् लुङ् लृङ्
प्र॰ ए॰ दीदांसिषेत् दीदांसिष्यात् अदीदांसिषीत् अदीदांसिषिष्यत्

दान-धातोर्यङ् लट् लिट् लुट् लृट्
प्र॰ ए॰ देदीदांस्यते देदीदांसांचक्रे देदीदांसिता देदीदांसिष्यते
लोट् लङ् विधिलिङ्
प्र॰ ए॰ देदीदांस्यतां अदेदीदांस्यत देदीदांस्येत
आशीर्लिङ् लुङ् लृङ्
प्र॰ ए॰ देदीदांसीष्ट अदेदीदांसिष्ट अदेदीदांसिष्यत

दान-धातोर्यङ् लुक् लट् लिट् लुट्
प्र॰ ए॰ देदीदांसेति—देदीदांसति देदीदांसांचकार देदीदांसिता
लृट् लोट् लङ्
प्र॰ ए॰ देदीदांसिष्यति— देदीदांसेतु—देदीदांसतु अदेदीदांसेत्—सत्
विधिलिङ् आशीर्लिङ् लुङ् लृङ्
प्र॰ ए॰ देदीदांसेत् देदीदांस्यात् अदेदीदांसीत् अदेदीदांसिष्यत्

द्विष-अप्रीतौ- लुक् लट्

	प्र॰	म॰	उ॰
ए॰	द्वेष्टि—द्विष्टे	द्वेक्षि—द्विक्षे	द्वेष्मि—द्विषे
द्वि॰	द्विष्टः—द्विषाते	द्विष्ठः—द्विषाथे	द्विष्वः—द्विष्वहे
ब॰	द्विषन्ति—द्विषते	द्विष्ठ—द्विड्ढ्वे	द्विष्मः—द्विष्महे

लिट् लुट् लृट् लोट् लङ्
प्र॰ ए॰ दिद्वेष द्वेष्टा द्वेक्ष्यति द्वेष्टु—द्विष्टात् अद्वेट्
दिद्विषे द्वेष्टासे द्वेक्ष्यते द्विष्टां अद्विष्ट
आशीर्लिङ् लुङ् लृङ्
प्र॰ ए॰ द्विष्यात् अद्विक्षत् अद्वेक्ष्यत् अवशिष्टान्यूह्यानि
द्विक्षीष्ट अद्विक्षत अद्वेक्ष्यत

दुह-प्रपूरणे लट्

	प्र॰	म॰	उ॰
ए॰	दोग्धि—दुग्धे—	धोक्षि—धुक्षे	दोह्मि—दुहे
द्वि॰	दुग्धः—दुहाते—	दुग्धः—दुहाथे	दुह्वः—दुह्वहे
ब॰	दुहन्ति—दुहते—	दुग्ध—दुग्ध्वे	दुह्मः—दुह्महे

लिट् लुट् लृट् लोट् लङ्

प्र॰ ए॰ दुदोह– दोग्धासि धोक्ष्यति दोग्धु–दुग्धात् अधोक्

दुदुहे– दोग्धासे धोक्ष्यते दुग्धां अदुग्ध

विधिलिङ् आशीर्लिङ् लुङ् लृङ्

प्र॰ ए॰ दुह्यात् दुह्यात् अधुक्षत् अधोक्ष्यत्–अधोक्ष्यत

दुहीत धुक्षीष्ट अदुग्ध शेषंपूर्ववत्

अधुक्षत

दुह-धातोर्हेतुमणिणच्- लट् लिट् लुट्

प्र॰ ए॰ दोहयति दोहयामास दोहयिता

लृट् लोट् लङ्

प्र॰ ए॰ दोहयिष्यति दोहयतु–दोहयतात् अदोहयत्

विधिलिङ् आशीर्लिङ् लुङ् लृङ्

प्र॰ ए॰ दोहयेत् दोह्यात् अदुदुहत् अदोहयिष्यत्–इत्यादि

दुह-धातोस्सन्- लट् लिट् लुट् लृट्

प्र॰ ए॰ दुधुक्षति दुधुक्षांचकार दुधुक्षिता दुधुक्षिष्यति

लोट् लङ् विधिलिङ् आशीर्लिङ्

प्र॰ ए॰ दुधुक्षतु–दुधुक्षतात्– अदुधुक्षत् दुधुक्षेत् दुधुक्ष्यात्

लुङ् लृङ्

प्र॰ ए॰ अदुधुक्षत् अदुधुक्षिष्यत्

दुह-धातोर्यङ्- लट् लुङ् लृङ्

प्र॰ ए॰ दोदुह्यते अदोदुहिष्ट अदोदुहिष्यत

दुह-धातोर्यङ्लुक्- लट् लुङ् लृङ्

प्र॰ ए॰ दोदुहीति–दोदोग्धि अदोदुहीत् अदोदोहिष्यत्

दिह–उपचये– लुक् लट्

	प्र॰	म॰	उ॰
ए॰	देग्धि–दिग्धे	धेक्षि–धीक्षे	देह्मि–दिह्ये
द्वि॰	दिग्धः–दिहाते	दिग्धः–दीहथे	दिह्वः–दिह्वहे
ब॰	दिहन्ति–दिहते	दिग्ध–दिध्वे	दिह्मः–दिह्महे

लिट्

	प्र॰	म॰	उ॰
ए॰	दिदेह–दिदिहे	दिदेहिथ–दिदिहिषे	दिदेह–दिदिहे
द्वि॰	दिदिहतुः–दिदिहाते	दिदिहथुः–दिदिहाथे	दिदिहिव–दिदिहिवहे
ब॰	दिदिहुः–दिदिहिरे	दिदिह–दिदिहिध्वे	दिदिहिम–दिदिहिमहे

लुट्

	प्र॰	म॰	उ॰
ए॰	दोग्धा	दोग्धासि—दोग्धासे	दोग्धास्मि—दोग्धाहे
द्वि॰	दोग्धारौ	दोग्धास्थः—दोग्धासाथे	दोग्धास्वः—दोग्धास्वहे
ब॰	दोग्धारः	दोग्धास्थ—दोग्धाध्वे	दोग्धास्मः—दोग्धास्महे

लृट्

	प्र॰	म॰	उ॰
ए॰	धोक्ष्यति—धोक्ष्यते	धोक्ष्यसि—धोक्ष्यसे	धोक्ष्यामि—धोक्ष्ये
द्वि॰	धोक्ष्यतः—धोक्ष्येते	धोक्ष्यथः—धोक्ष्येथे	धोक्ष्यावः—धोक्ष्यावहे
ब॰	धोक्ष्यन्ति—धोक्ष्यन्ते	धोक्ष्यथ—धोक्ष्यध्वे	धोक्ष्यामः—धोक्ष्यामहे

लोट्

	प्र॰	म॰	उ॰
ए॰	दोग्धु—दिग्धात्—दिग्धां	दिग्धि-दिग्धात्-धिक्ष्व	दोहानि—दोहै
द्वि॰	दिग्धां—दिहातां	दिग्धं—दिहाथां	दोहाव—दोहावहै
ब॰	दिहन्तु—दिहतां	दिग्ध—धिग्ध्वं	दोहाम—दोहामहै

लङ्

	प्र॰	म॰	उ॰
ए॰	अधोक्—अधोग्—अदिग्ध	अधोक्—अधोग्—अदिग्धां	अदोहं—अदिहि
द्वि॰	अदिग्धां—अदिहातां	अदिग्धं—अदिहाथां	अदिह्व—अदिह्वहि
ब॰	अदिहन्—अदिहता	अदिग्ध—अदिग्ध्वं	अदिह्म—अदिह्महि

विधिलिङ्

	प्र॰	म॰	उ॰
ए॰	दिह्यात्—दिहीत	दिह्याः—दिहीथाः	दिह्यां—दिहीय
द्वि॰	दिह्यातां—दिहीयातां	दिह्यातं—दिहीयाथां	दिह्याव—दिहीवहि
ब॰	दिह्युः—दिहिरन्	दिह्यात—दिहीध्वं	दिह्याम—दिहीमहि

आशीर्लिङ्

	प्र॰	म॰
ए॰	दिह्यात्—धिक्षीष्ट	दिह्याः—धिक्षीष्ठाः
द्वि॰	दिह्यास्तां—धिक्षीयास्तां	दिह्यास्तं—धिक्षीयास्थां
ब॰	दिह्यासुः—धिक्षीरन्	दिह्यास्त—धिक्षीध्वं

उत्तम

ए॰	दिह्यासं—धिक्षीय
द्वि॰	दिह्यास्व—धिक्षीवहि
ब॰	दिह्यास्म—धिक्षीमहि

लुङ्

	प्र०	म०
ए०	अधिक्षत्-अदिग्ध-अधिक्षत	अधिक्षः-अधिक्षाः-अदिग्धाः
द्वि०	अधिक्षतां-अधिक्षातां	अधिक्षतं-अधिक्षातां
ब०	अधिक्षन्-अधिक्षंत	अधिक्षत-अधिग्ध्वं-अधिक्षध्वं

उत्तम

ए०	अधिक्षं-अधिक्षि
द्वि०	अधिक्षाव:-अधिक्ष्वहि
ब०	अधिक्षाम:-अधिक्ष्महि

लृङ्

	प्र०	म०	उ०
ए०	अधेक्ष्यत्-अधेक्ष्यत	अधेक्ष्यः-अधेक्ष्यथाः	अधेक्ष्यं-अधेक्ष्ये
द्वि०	अधेक्ष्यतां-अधेक्ष्येतां	अधेक्ष्यतं-अधेक्ष्येथां	अधेक्ष्याव-अधेक्ष्यावहि
ब०	अधेक्ष्यन्-अधेक्ष्यन्त	अधेक्ष्यत-अधेक्ष्यध्वं	अधेक्ष्याम-अधेक्ष्यामहि

दिह-धातोर्हेतुमण्णिच्-लट् लुङ् लृङ्
प्र० ए० देहयति अदीदिहत् अदेहयिष्यत्

दिह-धातोः सन् लट् लुङ् लृङ्
प्र० ए० धिधिक्षति अदिधिक्षीत् अदिधिक्षिष्यत्

दिह-धातोर्यङ् लट् लुङ् लृङ्
प्र० ए० देदिह्यते अदेदिहिष्ट अदेदिहिष्यत

दिहधातोर्यङ् लुक्- लट् लुङ् लृङ्
प्र० ए० देदेग्ध-देदिहाति अदेदेहीत् अदेदेहिष्यत्

द्यु-अभिगमने- लट् लिट् लुट्
प्र० ए० द्यौति दुद्याव द्योतां- शेषंयुधातुवत्-

द्रा-कुत्सायांगतौ- लट् लुङ्
प्र० ए० द्राति- अद्रासीत्

दाप-लवने- लट् लुङ्
प्र० ए० दाति अदासीत्-अदासिष्टां-शेषंपूर्ववत्-
लुङि प्रथमपुरुषबहुवचनं-अदासिषुः

दरिद्रा-दुर्गतौ– लट्

	प्र०	म०	उ०
ए०	दरिद्राति	दरिद्रासि	दरिद्रामि
द्वि०	दरिद्रितः	दरिद्रिथः	दरिद्रिवः
ब०	दरिद्रति	दरिद्रिथ	दरिद्रिमः

लिट्

	प्र०	म०	उ०
ए०	दरिद्रांचकार-ददरिद्रौ	दरिद्रांचकर्थ-ददरिद्रिथ	दरिद्रांचकार-ददरिद्रौ
द्वि०	ददरिद्रतुः	ददरिद्रथुः	ददरिद्रिव
ब०	ददरिद्रुः	ददरिद्र	ददरिद्रिम

	लुट्	लृट्	लोट्	लङ्
प्र० ए०	दरिद्रिता	दरिद्रिष्यति	दरिद्रातु-दरिद्रितात्	अदरिद्रात्

	विधिलिङ्	आशीर्लिङ्	लुङ्	लृङ्
प्र० ए०	दरिद्रियात्	दरिद्र्यात्	अदरिद्रीत्-अदरिद्रासीत्	अदरिद्रिष्यत्

दु-दाञ्दानेश्लुः-उभयपदी– लट्

	प्र०	म०	उ०
ए०	ददाति-दत्ते	ददासि-धत्से	ददामि-ददे
द्वि०	दत्तः-ददाते	दत्थः-ददाथे	दद्वः-दद्वहे
ब०	ददति-ददते	दत्थ-दध्वे	दद्मः-दद्महे

लिट्

	प्र०	म०	उ०
ए०	ददौ-ददे	ददिथ-ददिषे	ददौ-ददे
द्वि०	ददतुः-ददाते	ददथुः-ददाथे	ददिव-ददिवहे
ब०	ददुः-ददिरे	दद-ददिध्वे	ददिम-ददिमहे

लुट्

	प्र०	म०	उ०
ए०	दाता-पूर्ववत्	दातासि-दातासे	दातास्मि-दाताहे
द्वि०	दातारौ–	दातास्थः-दातासाथे	दातास्वः-दातास्वहे
ब०	दातारः–	दातास्थ-दाताध्वे	दातास्मः-दातास्महे

लृट्

	प्र०	म०	उ०
ए०	दास्यति-दास्यते	दास्यसि-दास्यसे	दास्यामि-दास्ये
द्वि०	दास्यतः-दास्येते	दास्यथः-दास्येथे	दास्यावः-दास्यावहे
ब०	दास्यन्ति-दास्यंते	दास्यथ-दास्यध्वे	दास्यामः-दास्यामहे

लोट्

	प्र·	म·	उ·
ए·	ददातु–दत्तात्–दत्तां	देहि–दत्तात्–धत्स्व	ददानि–ददै
द्वि·	दत्तां–ददातां	दत्तं–ददाथां	ददाव–ददावहै
ब·	ददतु–ददतां	दत्त–दध्वं	ददाम–ददामहै

लङ्

	प्र·	म·	उ·
ए·	अददात्–अदत्त	अददाः–अदत्थाः	अददं–अददि
द्वि·	अदत्तां–अददातां	अदत्तं–अदथातां	अदद्व–अदद्वहि
ब·	अददुः–अददत	अदत्त–अदध्वं	अदद्म–अदद्महि

विधिलिङ्

	प्र·	म·	उ·
ए·	दद्यात्–ददीत	दद्याः–ददीथाः	दद्यां–ददीय
द्वि·	दद्यातां–ददीयातां	दद्यातं–ददीयाथां	दद्याव–ददीवहि
ब·	दद्युः–ददीरन्	दद्यात–ददीध्वं	दद्याम–ददीमहि

आशीर्लिङ्

	प्र·	म·	उ·
ए·	देयात्–दासीष्ट	देयाः–दासीष्ठाः	देयासं–दासीय
द्वि·	देयास्तां–दासीयास्तां	देयास्तं–दासीयास्थां	देयास्व–दासीवहि
ब·	देयासुः–दासीरन्	देयास्त–दासीध्वं	देयास्म–दासीमहि

लुङ्

	प्र·	म·	उ·
ए·	अदात्–अदित	अदाः–अदिथाः	अदां–अदिषि
द्वि·	अदातां–अदिषातां	अदातं–अदिषाथां	अदाव–अदिष्व
ब·	अदुः–अदिषत	अदात–अदिध्वं	अदाम–अदिष्म

लङ्

	प्र·	म·
ए·	अदास्यत्–अदास्यत	अदास्यः–अदास्यथाः
द्वि·	अदास्यतां–अदास्येतां	अदास्यतं–अदास्येथां
ब·	अदास्यन्–अदास्यंत	अदास्यत–अदास्यध्वं

उत्तम

ए·	अदास्यं–अदास्ये
द्वि·	अदास्याव–अदास्यावहि
ब·	अदास्याम–अदास्यामहि

डुदाञ्–दाने–उभयपदी–श्लुः लट् लिट् लुङ्

प्र॰ ए॰ दत्ते देदे अदित

दिष–शब्दे–छा॰–दिधेष्टि दिदिष्टः दिदिषति

धन–धान्ये–छां॰–दधंति दधंतः दधनति ददान

डु–दाञ्–दाने– लट् लिट् लुट् ऌट्

प्र॰ ए॰ ददाति–दत्तः–ददति ददौ दाता ददातु–दत्तात्

म॰ देहि–दत्तात्

लङ् लिङ् लुङ्

प्र॰ ए॰ अददात् दद्यात् अदात्–अदातां–अदुः

दीवृ–क्रीडा–विजगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकांतिगतिषु–श्यन्

लट् लिट् लुट् लुङ् ऌङ्

प्र॰ ए॰ दीव्यति दिदेव देविता अदेवीत् अदेविष्यत्–परितापे–दूयति–

दो–अवखंडने– लट् लिट् लुट् ऌट् लोट् लङ्

प्र॰ ए॰ द्यति ददौ दाता दास्यति द्यतु–द्यतात् अद्यत्

विधिलङ् आशीर्लिङ् लुङ् ऌङ्

प्र॰ ए॰ द्यत् देयात् अदात् अदास्यत्

दुष–वैकृत्ये– लट् लुङ्

प्र॰ ए॰ दुष्यति अदुषत्

दृप–हर्षणमोहनयोः लट् दृप्यति लुङ् अदृपत्

द्रुह–जिघांसायां– लट् लिट् म॰

प्र॰ ए॰ द्रुह्यति दुद्राह–दोग्धा दुद्रोय–दुद्रोहिथ

उत्तम–दुद्रुह्व–दुद्रुहिव–दुद्रुह्म–दुद्रुहिम

लुट् द्रोहिता–द्रोग्धा–द्रोढा

ऌट् द्रोहिष्यति–ध्रोक्ष्यति–अद्रुहत्

दमु–उपशमने लट् दाम्यति– अदमत्

दसुच– लट् दस्यति

दु–उपतापे–श्नुः लट् लिट् लुट् ऌट् लोट्

प्र॰ ए॰ दुनोति दुदाव दोता दोष्यति दुनोतु–तात्

लङ् लिङ् आशीर्लिङ् लुङ् ऌङ्

प्र॰ ए॰ अदुनोत् दुनुयात् दूयात् अदावीत् अदोष्यत्

दंभु–दंभने– दभ्नोति– ददंभ देभतुः ददंभतुः ददंभिथ

देभिथ– देभ– दभ्यात्– ददंभदुः– देभतुः– दुदंभ

दघ-घातने- छां० लट् दघ्नोति- दाशृ-हिंसायां-छा० दाश्नोति

दृ-हिंसायां-लट् लिट् लुट् लृट् लोट् लङ्

प्र० ए० दृणोति ददार दर्ता दरिष्यति दृणोतु-दृणुतात्- अदृणोत्

दिश-अतिसर्जने-शः उभयपदि- लट् लुट्

प्र० ए० दिशति-दिशते देष्टा-देष्टासे

दिश्यात्-दिक्षीष्ट-अदिक्षत्-अदिक्षत

दृप-दृंफ-उत्क्लेशे-दृपति-दृंपति-

द्रभ-ग्रंथे- लट् लिट् लुट्

प्र० ए० द्रभति दद्राभ द्रभिता

दृती-हिंसाग्रंथनयोः-लट् लिट् लुट्

प्र० ए० दृतति ददर्त दर्तिता

दृण-हिंसागतिकौटिल्येषु-लट्- दृणति-

दॄ-विदारणे- श्ना दृणाति- ददरतुः

दुल-उत्क्षेपणे- दोलयति-

अथ धकारादिपरस्मैपदानि ।

धाख-शोषणेऽलमर्थयोः लट् लिट् लुट् लृट्

प्र० ए० धाखति- दधाख धाखिता धाखिष्यति

लोट् लङ् लिङ् आशीर्लिङ्

प्र० ए० धाखतु-धाखतात् अधाखत् धाखेत् धाख्यात्

लुङ् लृङ्

प्र० ए० अधाखीत् अधाखिष्यत्

धाख-धातोर्हेतुमण्णिच्- लट् लिट् लुट्

प्र० ए० धाखयति-धाखयते धाखयामास धाखयिता

लृट् लोट्

प्र० ए० धाखयिष्यति-धाखयिष्यते धाखयतु-धाखयतात्

लङ् विधिलिङ् आशीर्लिङ्

प्र० ए० अधाखयत्-अधाखयत धाखयेत् धाख्यात्-धाखयिषीष्ट

लुङ् लृङ्

प्र० ए० अदधाखत् अधाखयिष्यत्-अधाखयिष्यत

धाख-धातोस्सन्- लट् यङ् यङ् लुक्
प्र॰ ए॰ दिधाखिषति दाधाख्यते दाधाखीति-दाधाक्ति

धज-गतौ- लट् हेतुमणिणच् सन् यङ्
प्र॰ ए॰ धजति धाजयति-धाजयते दिधजिषति दाधज्यते
यङ् लुक् दाधजीति-दाधक्ति

धजि-गतौ- लट् हेतुमणिणच् सन् यङ्
प्र॰ ए॰ धंजति धंजयति-धंजयते दिधंजिषति दाधंज्यते
यङ् लुक् दाधंजीति-दाधंक्ति

धृज-गतौ- लट् हेतुमणिणच् सन् यङ्
प्र॰ ए॰ धर्जति धर्जयति-धर्जयते दिधर्जिषति दरीधृज्यते
यङ् लुक् धरीधृजीति-धरीधृक्ति

धृजि-गतौ- लट् हेतुमणिणच् सन् यङ्
प्र॰ ए॰ धृंजति धृंजयति-धृंजयते दिधृंजिषति दरीधृंज्यते

ध्वज-गतौ- लट् हेतुमणिणच् सन् यङ्
प्र॰ ए॰ ध्वजति ध्वजयति-ध्वजयते दिध्वजिषति दाध्वज्यते

ध्वजि-गतौ- लट् हेतुमणिणच् सन् यङ्
प्र॰ ए॰ ध्वंजति ध्वंजयति-ध्वंजयते दिध्वंजिषति दाध्वंज्यते

ध्रिजश्च ध्रेजति ध्रेजयति-ध्रेजयते दिध्रिजिषति-दिध्रेजिषति-दिध्रेक्ष
यङ् दाध्रज्यते- यङ् लुक्- दाध्रजीति- दाध्रक्ति-

ध्रिजधातोर्यङ् लट् यङ् लुक् लट्
प्र॰ ए॰ दाध्रज्यते दाध्रजीति-दाध्रक्ति
दाध्रंज्यते दाध्रंजीति-दाध्रंक्ति
दरीधृज्यते दरीधृजीति-दरीधर्क्ति
दरीधृंज्यते दरीधृंजीति-दरीधर्क्ति
दाध्वज्यते दाध्वजीति-दाध्वक्ति
दाध्वंज्यते दाध्वंजीति-दाध्वंक्ति
देध्रिज्यते देध्रिजीति-देध्रिक्ति

धूप-संतापे- लट्

	प्र॰	म॰	उ॰
ए॰	धूपायति	धूपायसि	धूपायामि
द्वि॰	धूपायतः	धूपायथः	धूपायावः
ब॰	धूपायन्ति	धूपायथ	धूपायामः

लिट्

	प्र॰	म॰	उ॰
ए॰	धूपायामास	धूपायामासिथ	धूपायामास
द्वि॰	धूपायामासतुः	धूपायामासथुः	धूपायामासिव
ब॰	धूपायामासुः	धूपायामास	धूपायामासिम

लुट्

	प्र॰	म॰	उ॰
ए॰	धूपायिता	धूपायितासि	धूपायितास्मि
द्वि॰	धूपायितारौ	धूपायितास्थः	धूपायितास्वः
ब॰	धूपायितारः	धूपायितास्थ	धूपायितास्मः

लृट्

	प्र॰	म॰	उ॰
ए॰	धूपायिष्यति	धूपायिष्यसि	धूपायिष्यामि
द्वि॰	धूपायिष्यतः	धूपायिष्यथः	धूपायिष्यावः
ब॰	धूपायिष्यन्ति	धूपायिष्यथ	धूपायिष्यामः

लोट्

	प्र॰	म॰	उ॰
ए॰	धूपायितु-धूपायतात्	धूपाय-धूपायतात्	धूपायानि
द्वि॰	धूपायतां	धूपायतं	धूपायाव
ब॰	धूपायन्तु	धूपायत	धूपायाम

लङ्

	प्र॰	म॰	उ॰
ए॰	अधूपायत्	अधूपायः	अधूपायं
द्वि॰	अधूपायतां	अधूपायतं	अधूपायाव
ब॰	अधूपायन्	अधूपायत	अधूपायाम

विधिलिङ्

	प्र॰	म॰	उ॰
ए॰	धूपायेत्	धूपायेः	धूपायेयं
द्वि॰	धूपायेतां	धूपायेतं	धूपायेव
ब॰	धूपायेयुः	धूपायेत	धूपायेम

आशीर्लिङ्

	प्र॰	म॰	उ॰
ए॰	धूपाय्यात्	धूपाय्याः	धूपाय्यासं

आशीर्लिङ्

	प्र॰	म॰	उ॰
द्वि॰	धूपाय्यास्तां	धूपाय्यास्तं	धूपाय्यास्व
ब॰	धूपाय्यासुः	धूपाय्यास्त	धूपाय्यास्म

लुङ्

	प्र॰	म॰	उ॰
ए॰	अधूपायीत्	अधूपायीः	अधूपायिषं
द्वि॰	अधूपायिष्टां	अधूपायिष्टं	अधूपायिष्व
ब॰	अधूपायिषुः	अधूपायिष्ट	अधूपायिष्म

लृङ्

	प्र॰	म॰	उ॰
ए॰	अधूपायिष्यत्	अधूपायिष्यः	अधूपायिष्यं
द्वि॰	अधूपयिष्यतां	अधूपायिष्यतं	अधूपायिष्याव
ब॰	अधूपायिष्यन्	अधूपायिष्यत	अधूपायिष्याम

धूप-धातोर्हेतुमयिणच्-लट् लिट् लुट्
प्र॰ ए॰ धूपाययति-धूपाययते धूपाययामास धूपाययिता
लृट् लोट् लङ्
प्र॰ ए॰ धूपाययिष्यति धूपाययतु-धूपाययतात् अधूपाययत्
विधिलिङ् आशीर्लिङ् लुङ्
प्र॰ ए॰ धूपाययेत् धूपाय्यात् अदुधूपायत्-अदूधुपत-
लृङ् अधूपाययिष्यत्-अधूपयिष्यत्

धूप-धातोस्सन् लट् लिट् लुट् लृट्
प्र॰ ए॰ दुधूपिषति दुधूपिषामास दुधूपिषिता दुधूपिषिष्यति
लोट् लङ् लिङ्
प्र॰ ए॰ दुधूपिषतु-दुधूपिषतात् अदुधूपिषत् दुधूपिषेत्
आशीर्लिङ् लुङ् लृङ्
प्र॰ ए॰ दुधूपिष्यात् अदुधूपिषीत् अदुधूपिषिष्यत्

धूप-धातोर्यङ् लट् लिट् लुट् लृट्
प्र॰ ए॰ दोधूप्यते दोधूपांचक्रे दोधूपिता दोधूपिष्यते
लोट् लङ् लिङ् आशीर्लिङ्
प्र॰ ए॰ दोधूप्यतां अदोधूप्यत दोधूप्येत दोधूपिषीष्ट
लुङ् लृङ्
प्र॰ ए॰ अदोधूपिष्ट अदोधूपिष्यत

धूप–धातोर्यङ् लुक्–लट् लिट् लुट्
प्र· ए· दोधूपीति–दोधूप्ति दोधूपांबभूव दोधूपिता

लृट् लोट् लङ्
प्र· ए· दोधूपिष्यति दोधूपीतु–दोधूप्तु–अदोधूपीत–अदोधूप्

लिङ् आशीर्लिङ् लुङ् लृङ्
प्र· ए· दोधूप्यात् दोधूप्यात् अदोधूपीत् अदोधूपिष्यत्

धण्–शब्दे–धण्इत्यपि–लट् हेतुमण्णिच् सन्
प्र· ए· ध्वणति ध्वणयति–ध्वणयते दिध्वणिषति

यङ् यङ् लुक्
प्र· ए· दंध्वण्यते दंध्वणीति–दंधण्तु–धणतीत्यादि–

ध्रण–शब्दे– लट् हेतुमण्णिच् सन् यङ्
प्र· ए· ध्रणति ध्राणयति– दिध्रणिषति दंध्रण्यते

यङ् लुक्– दंध्रणीति–दंध्रणित–

धोर्ऋ–गतिचातुर्ये–लट् हेतुमण्णिच् सन् यङ्
प्र· ए· धोरति धोरयति–धोरयते दुधोरिषति दोधुर्यते

यङ् लुक्– दोधोरीति–दोधोर्ति

धुर्वी–हिंसार्थः– लट् हेतुमण्णिच् सन् यङ्
प्र· ए· धूर्वति धूर्वयति– दुधूर्विषति दोधूर्व्यते

यङ् लुक्– दोधूर्वीति– दोधोर्ति

डु–धाञ्–धारणपोषणयोः उभयपदी– दानइत्येके

लट् ए· दधाति लट् लुङ्
द्वि· धतः ए· धत्ते ए· अधित
ब· दधति द्वि· धत्से

लट् लिट् लुट् लृट् लोट् लङ्
प्र· ए· दधाति दधौ धाता धास्यति दधातु–धत्तात् अधात्

विधिलिङ् आशीर्लिङ् लुङ् लृङ्
प्र· ए· धायात्– धेयात् अधात् अधास्यत्

अवशिष्टानिपूर्ववदित्यूह्यानि ।

धिवि–प्रीणनार्थः–

लट्

	प्र॰	म॰	उ॰
ए॰	धिनोति	धिनोषि	धिनोमि
द्वि॰	धिनुतः	धिनुथः	धिनुवः–धिन्वः
ब॰	धिन्वन्ति	धिनुथ	धिनुमः–धिन्मः

लिट्

	प्र॰	म॰	उ॰
ए॰	दिधिन्व	दिधिन्विथ	दिधिन्व
द्वि॰	दिधिन्वतुः	दिधिन्वथुः	दधिन्विव
ब॰	दिधिन्वुः	दिधिन्व	दधिन्विम

लुट्

	प्र॰	म॰	उ॰
ए॰	धिन्विता	धिन्वितासि	धिन्वितास्मि
द्वि॰	धिन्वितारौ	धिन्वितास्थः	धिन्वितास्वः
ब॰	धिन्वितारः	धिन्वितास्थ	धिन्वितास्मः

लृट्

	प्र॰	म॰	उ॰
ए॰	धिन्विष्यति	धिन्विष्यसि	धिन्विष्यामि
द्वि॰	धिन्विष्यतः	धिन्विष्यथः	धिन्विष्यावः
ब॰	धिन्विष्यन्ति	धिन्विष्यथ	धिन्विष्यामः

लोट्

	प्र॰	म॰	उ॰
ए॰	धिनोतु–धिनुतात्	धिनु–धिनुतात्	धिनवानि
द्वि॰	धिनुतां	धिनुतं	धिनवाव
ब॰	धिन्वन्तु	धिनुत	धिनवाम

लङ्

	प्र॰	म॰	उ॰
ए॰	अधिनोत्	अधिनोः	अधिनवं
द्वि॰	अधिनुतां	अधिनुतं	अधिन्व–अधिनुव
ब॰	अधिन्वन्	अधिनुत	अधिन्म–अधिनुम

विधिलिङ्

	प्र॰	म॰	उ॰
ए॰	धिनुयात्	धिनुयाः	धिनुयां

विधिलिङ्

	प्र.	म.	उ.
द्वि.	धिनुयातां	धिनुयातं	धिनुयाव
ब.	धिनुयुः	धिनुयात	धिनुयाम

आशीर्लिङ्

	प्र.	म.	उ.
ए.	धिन्व्यात्	धिन्व्याः	धिन्व्यासं
द्वि.	धिन्व्यास्तां	धिन्व्यास्तं	धिन्व्यास्व
ब.	धिन्व्यासुः	धिन्व्यास्त	धिन्व्यास्म

लुङ्

	प्र.	म.	उ.
ए.	अधिन्वीत्	अधिन्वीः	अधिन्वीषं
द्वि.	अधिन्विष्टां	अधिन्विष्टं	अधिन्विष्व
ब.	अधिन्विषुः	अधिन्विष्ट	अधिन्विष्म

लृङ्

	प्र.	म.	उ.
ए.	अधिन्विष्यत्	अधिन्विष्यः	अधिन्विष्यं
द्वि.	अधिन्विष्यतां	अधिन्विष्यतं	अधिन्विष्याव
ब.	अधिन्विष्यन्	अधिन्विष्यत	अधिन्विष्याम

धिवि–धातोर्हेतुमर्णिणच् लट् लिट् लुट्

प्र. ए. धिन्वयति–धिन्वयते धिन्वयामास धिन्वयिता

लृट् लोट्

प्र. ए. धिन्वयिष्यति–धिन्वयिष्यते धिन्वयतु–धिन्वयतात्

लङ् लिङ् आशीर्लिङ्

प्र. ए. अधिन्वयत्– धिन्वयेत्–धिन्वयेत धिन्व्यात्–धिन्वयिषीष्ट

लुङ् लृङ्

प्र. ए. अदिधिन्वत्–अदिधिन्वत अधिन्वयिष्यत्–अधिन्वयिष्यत

धिवि–धातोस्सन्– लट् लिट् लुट्

प्र. ए. दिधिन्विषति दिधिन्विषामास दिधिन्विषिता

लृट् लोट् लङ्

प्र. ए. दिधिन्विषिष्यति दिधिन्विषतु–दिधिन्विषतात् अदिधिन्विषत्

लिङ् आशीर्लिङ् लुङ् लृङ्

प्र. ए. दिधिन्विषेत् दिधिन्विष्यात् अदिधिन्विषीत्–अदिधिन्विषिष्यत्

धिवि-धातोर्यङ्- लट् लिट् लुट् लृट्
प्र० ए० देधिन्व्यते देधिन्व्यांचक्रे देधिन्विता देधिन्विष्यते
लोट् लङ् लिङ् आशीर्लिङ्
प्र० ए० देधिन्व्यतां अदेधिन्व्यत देधिन्व्येत देधिन्विषीष्ट
लुङ् लृङ्
प्र० ए० अदेधिन्विष्ट अदेधिन्विष्यत

धिवि-धातोर्यङ् लुक्-लट् लिट् लुट्
प्र० ए० देधिन्वीति-देधेन्ति देधिन्वामास देधिन्विता
लृट् लोट् लङ्
प्र० ए० देधिन्विष्यति देधिन्वीतु-देधेन्तु-देधिन्तात् अदेधिन्वीत्-अदेधेन्
विधिलिङ् आशीर्लिङ् लुङ् लृङ्
प्र० ए० देधिन्व्यात् देधिन्व्यात् अदेधिन्वीत् अदेधिन्विष्यत्

धवि-गत्यर्थः- लट् हेतुमणिणच् सन् यङ्
प्र० ए० धन्वति- धन्वयति-धन्वयते दिधन्विषति दाधन्व्यते
यङ् लुक्- दाधन्वीति-दाधन्ति-

उ-धावु-गतिशुध्योः शप् लट् हेतुमणिणच्
प्र० ए० धावति-धावते धावयति-धावयते
सन् यङ् यङ् लुक्
प्र० ए० दिधाविषति- दाधाव्यते दाधावीति-दाधाति उभयपदि-

ध्राक्षि-ध्वाक्षि-घोरवासितेच- लट्
प्र० ए० ध्रांक्षति-ध्वांक्षति-

हेतुमणिणच् लट्
प्र० ए० ध्रांक्षयति-ध्रांक्षयते-ध्वांक्षयति-ध्वांक्षयते
सन् लट् दिध्रांक्षिषति-दिध्वांक्षिषति-
यङ् लट् दाध्रांक्ष्यते-दाध्वांक्ष्यते-
यङ् लुक्-लट् दाध्रांक्षीति-दाध्वांक्षीति-दाध्रांष्टि-दाध्वांष्टि-

ध्वन-शब्दे-धनइत्यपि-ध्वनच- लट् हेतुमणिणच्
प्र० ए० ध्वनति- ध्वनयति-ध्वानयते-
सन्- यङ् यङ् लुक्
प्र० ए० दिध्वनिषति दंध्वन्यते दंध्वनीति-दंधन्ति

धञ्-धारणे लट् हेतुमण्णिच् सन् यङ्

प्र॰ ए॰ धरति धारयति—धारयते दिधीर्षति देधीयति—

यङ् लुक् धर्धरीति—धर्धर्ति—शेषंकृधातुवत्

धेट्-पालने— लट्

	प्र॰	म॰	उ॰
ए॰	धयति	धयसि	धयामि
द्वि॰	धयतः	धयथः	धयावः
ब॰	धयन्ति	धयथ	धयामः

लिट्

	प्र॰	म॰	उ॰
ए॰	दधौ	दधिथ—दधाथ	दधौ
द्वि॰	दधतुः	दधथुः	दधिव
ब॰	दधुः	दध	दधिम

लुट्

	प्र॰	म॰	उ॰
ए॰	धाता	धातासि	धातास्मि
द्वि॰	धातारौ	धातास्थः	धातास्वः
ब॰	धातारः	धातास्थ	धातास्मः

लृट्

	प्र॰	म॰	उ॰
ए॰	धास्यति	धास्यसि	धास्यामि
द्वि॰	धास्यतः	धस्यथः	धास्यावः
ब॰	धास्यन्ति	धास्यथ	धास्यामः

लोट्

	प्र॰	म॰	उ॰
ए॰	धयतु—धयतात्	धाय—धायतात्	धायानि
द्वि॰	धयन्तां	धायतं	धायाव
ब॰	धयन्तु	धायत	धायाम

लङ्

	प्र॰	म॰	उ॰
ए॰	अधयत्	अधयः	अधयं
द्वि॰	अधयतां	अधयतं	अधयाव
ब॰	अधयन्	अधयत	अधयाम

विधिलिङ्

	प्र.	म.	उ.
ए.	धयेत्	धयेः	धयेयं
द्वि.	धयेतां	धयेतं	धयेव
ब.	धयेयुः	धयेत	धयेम

आशीर्लिङ्

	प्र.	म.	उ.
ए.	धेयात्	धेयाः	धेयासं
द्वि.	धेयास्तां	धेयास्तं	धेयास्व
ब.	धेयासुः	धेयास्त	धेयास्म

लुङ्

	प्र.	प्र.	प्र.
ए.	अदधत्	अधासीत्	अधात्
द्वि.	अदधतां	अधासिष्टां	अधातां
ब.	अदधन्	अधासिषुः	अधुः
	म.	म.	म.
ए.	अदधः	अधासीः	अधाः
द्वि.	अदधतं	अधासिष्टं	अधातं
ब.	अदधत	अधासिष्ट	अधात
	उ.	उ.	उ.
ए.	अदधं	अधासिषं	अधां
द्वि.	अदधाव	अधासिष्व	अधाव
ब.	अदधाम	अधासिष्म	अधाम

लृङ्

	प्र.	म.	उ.
ए.	अधास्यत्	अधास्यः	अधास्यं
द्वि.	अधास्यतां	अधास्यतं	अधास्याव
ब.	अधास्यन्	अधास्यत	अधास्याम

धेट्-धातोर्हेतुमण्णिच्-लट्　　लिट्　　लुट्

प्र. ए. धापयति-धापयते　　धापयामास　　धापयिता

लृट्　　लोट्

प्र. ए. धापयिष्यति-धापयिष्यते　　धापयतु-धापयतात्-धापयतां-

लङ् लिङ् आशीर्लिङ्
प्र· ए· अधापयत्–अधापयत धापयेत्–धापयेत धाप्यात्
लुङ् लृङ्
प्र· ए· अदीधपत् अधापयिष्यत्–अधापयिष्यत

धेट्–धातोः सन्– लट् लिट् लुट् लृट्
प्र· ए· दिधासति दिधासामास दिधासिता दिधासिष्यति
लोट् लङ्
प्र· ए· दिधासतु–दिधासतात्– अदिधासत्–अदिधासत– अदिधासेत्
आशीर्लिङ् लुङ् लृङ्
प्र· ए· दिधास्यात् अदिधासीत् अदिधासिष्यत्

धेट्–धातोर्यङ्– लट् लिट् लुट् लृट्
प्र· ए· देधीयते देधीयांचक्रे देधीयिता देधीयिष्यते
लोट् लङ् लिङ् आशीर्लिङ्
प्र· ए· देधीयतां अदेधीयत देधीयेत देधीयिषीष्ट
लुङ् अदेधीयिष्ट– लृङ् अदेधीयिष्यत

धेट्–धातोर्यङ् लुक्– लट् दाधेति–

धै–तृप्तौ– लट् हेतुमण्णिच् सन् यङ्
प्र· ए· धायति धापयति–धापयते दिधासति– दाधायते
यङ् लुक्– दाधेति–दाधाति–

ध्यै–चिंतायां लट् हेतुमण्णिच् सन् यङ्
प्र· ए· ध्यायति– ध्यापयति-ते दिध्यासति दाध्यायते
यङ् लुक्– दाध्येति–दाध्याति–

ध्मा–शब्दाग्निसंयोगयोः लट्

	प्र·	म·	उ·
ए·	धमति	धमसि	धमामि
द्वि·	धमतः	धमथः	धमावः
ब·	धमन्ति	धमथ	धमामः

लिट्

	प्र·	म·	उ·
ए·	दध्मौ	दध्मिथ–दध्माथ	दध्मौ
द्वि·	दध्मतुः	दध्मथुः	दध्मिव
ब·	दध्मुः	दध्म	दध्मिम

लुट्

	प्र॰	म॰	उ॰
ए॰	ध्माता	ध्मातासि	ध्मातास्मि
द्वि॰	ध्मातारौ	ध्मातास्थः	ध्मातास्वः
ब॰	ध्मातारः	ध्मातास्थ	ध्मातास्मः

लृट्

	प्र॰	म॰	उ॰
ए॰	ध्मास्यति	ध्मास्यसि	ध्मास्यामि
द्वि॰	ध्मास्यतः	ध्मास्यथः	ध्मास्यावः
ब॰	ध्मास्यन्ति	ध्मास्यथ	ध्मास्यामः

लोट्

	प्र॰	म॰	उ॰
ए॰	धमतु—धमतात्	धम—धमतात्	धमानि
द्वि॰	धमतां	धमतं	धमाव
ब॰	धमन्तु	धमत	धमाम

लङ्

	प्र॰	म॰	उ॰
ए॰	अधमत्	अधमः	अधमं
द्वि॰	अधमतां	अधमतं	अधमाव
ब॰	अधमन्	अधमत	अधमाम

विधिलिङ्

	प्र॰	म॰	उ॰
ए॰	धमेत्	धमेः	धमेयं
द्वि॰	धमेतां	धमेतं	धमेव
ब॰	धमेयुः	धमेत	धमेम

आशीर्लिङ्

	प्र॰	म॰	उ॰
ए॰	ध्मायात्—ध्मेयात्	ध्मायाः—ध्मेयाः	ध्मायासं—ध्मेयासं
द्वि॰	ध्मायास्तां—ध्मेयास्तां	ध्मायास्तं—ध्मेयास्तं	ध्मायास्व—ध्मेयास्व
ब॰	ध्मायासुः—ध्मेयासुः	ध्मायास्त—ध्मेयास्त	ध्मायास्म—ध्मेयास्म

लुङ्

	प्र॰	म॰	उ॰
ए॰	अध्मासीत्	अध्मासीः	अध्मासिषं

लुङ्

	प्र०	म०	उ०
द्वि०	अध्मासिष्टां	अध्मासिष्टं	अध्मासिष्व
ब०	अध्मासिषुः	अध्मासिष्ट	अध्मासिष्म

लृङ्

	प्र०	म०	उ०
ए०	अध्मास्यत्	अध्मास्यः	अध्मास्यं
द्वि०	अध्मास्यतां	अध्मास्यतं	अध्मास्याव
ब०	अध्मास्यन्	अध्मास्यत	अध्मास्याम

ध्मा-धातोर्हेतुमण्णिच्-लट् — लिट् — लुट्

प्र० ए० ध्मापयति-ध्मापयते — ध्मापयामास — ध्मापयिता

लृट् — लोट् — लङ्

प्र० ए० ध्मापयिष्यति-ध्मापयिष्यते — ध्मापयतु-ध्मापयतात् — ध्मापयत्-त

विधिलिङ् — आशीर्लिङ् — लुङ्

प्र० ए० ध्मापयेत्-ध्मापयेत — ध्माप्यात् — अदिध्मपत्-अदिध्मपत

लृङ् अध्मापयिष्यत्-अध्मापयिष्यत-

ध्मा-धातोस्सन्- लट् — लिट् — लुट् — लृट्

प्र० ए० दिध्मासति- — दिध्मासामास — दिध्मासिता — दिध्मासिष्यति

लोट् — लङ् — लिङ् — आशीर्लिङ् — लुङ्

प्र० ए० दिध्मासतु — अदिध्मासत् — दिध्मासेत् — दिध्मास्यात् — अदिध्मासीत्

लृङ् अदिध्मासिष्यत्

ध्मा-धातोर्यङ्- लट् — लिट् — लुट् — लृट्

प्र० ए० देध्मीयते — देध्मीयांचक्रे — देध्मीयिता — देध्मीयिष्यते

लोट् — लङ् — लिङ् — आशीर्लिङ्

प्र० ए० देध्मीयतां — अदेध्मीयत — देध्मीयेत — देध्मीयिषीष्ट

लुङ् — लृङ्

प्र० ए० अदेध्मीयिष्ट — अदेध्मीयिष्यत

ध्मा-धातोर्यङ् लुक् लट् — लिट् — लुट् — लृट्

प्र० ए० दाध्मेति-दाध्माति — दाध्मामास — दाध्मिता — दाध्मिष्यति

लोट् दाध्मेतु-दाध्मातु-दाध्मातात्

लङ् — लिङ् — आशीर्लिङ्

प्र० ए० अदाध्मात्-अदाध्मेत्- — दध्मायात् — दाध्मेयात्

लुङ् अदाध्मासीत्- — लृङ् अदाध्मास्यत्

ध्वृ-हूर्च्छने- लट् लिट् लुट् लोट् लङ्
प्र· ए· ध्वरति दध्वार ध्वर्ता ध्वरतु-ध्वरतात् अध्वरत्

लिङ् आशीर्लिङ् लुङ् लृङ्
प्र· ए· ध्वरेत् ध्वियात् अध्वार्षीत् अध्वरिष्यत्-

ध्वृ-धातोर्हेतुमति णिच्-लट् लिट् लुट् लृट्
प्र· ए· ध्वारयति-ध्वारयते ध्वारयांचक्रे ध्वारयिता ध्वारयिष्यति

लोट् लङ् लिङ् आशीर्लिङ्
प्र· ए· ध्वारयतु-ध्वारयतात् अध्वारयत् ध्वारयेत् ध्वार्यात्

लुङ् लृङ्
प्र· ए· अदिध्वरत् अध्वारयिष्यत्

ध्वृ-धातोस्सन्- लट् लिट् लुट् लृट्
प्र· ए· दुध्वूर्षति दुध्वूर्षामास दुध्वूर्षिता दुध्वूर्षिष्यत्

लोट् लङ् लिङ् आशीर्लिङ्
प्र· ए· दुध्वूर्षतु-दुध्वूर्षतात् अदुध्वूर्षत् दुध्वूर्षेत् दुध्वूर्ष्यात्

लुङ् अदुध्वूर्षीत् लृङ् अदुध्वूर्षिष्यत्

ध्वृ-धातोर्यङ्- लट् लिट् लुट् लृट्
प्र· ए· दाध्वर्यते दाध्वरांचक्रे दाध्वरिता दाध्वरिष्यते

लोट् लङ् लिङ् आशीर्लिङ् लुङ्
दाध्वर्यतां अदाध्वर्यत दाध्वर्येत दाध्वरिष्ट अदाध्वरिष्ट

लृङ् अदाध्वरिष्यत

ध्वृ-धातोर्यङ् लुक् लट् प्रथम

ए·	दर्ध्वरीति	दरिध्वरीति	दरीध्वरीति
	दर्ध्वर्ति	दरिध्वर्ति	दरीध्वर्ति
द्वि·	दर्ध्वृतः	दरिध्वृतः	दरीध्वृतः
उ· ए·	दर्ध्वृति	दरिध्वर्ति	दरीध्वति
म· ए·	दर्ध्वरीषि-दर्ध्वर्षि-	दरिध्वर्षि	दरीध्वर्षि
द्वि·	दर्ध्वृथः	दरिध्वृथः	दरीध्वृथः
ब·	दर्ध्वृथ	दरिध्वृथ	दरीध्वृथ

उ· ए· दर्ध्वरीमि-दर्ध्वर्मि दरिध्वरीमि-दरिध्वर्मि- दरीध्वरीमि-दरीध्वर्मि
द्वि· दर्ध्वृवः दरिध्वृवः दरीध्वृवः
ब· दर्ध्वृमः दरिध्वृमः दरीध्वृमः

लिट्

	प्र०	म०	उ०
ए०	दरिध्रामास	दरिध्रामासिथ	दरिध्रामास
द्वि०	दरिध्रामासतुः	दरिध्रामासथुः	दरिध्रामासिव
ब०	दरिध्रामासुः	दरिध्रामास	दरिध्रामासिम

लुट्

	प्र०	म०	उ०
ए०	दरिध्वरिता	दरिध्वरितासि	दरिध्वरितास्मि
द्वि०	दरिध्वरितारौ	दरिध्वरितास्थः	दरिध्वरितास्वः
ब०	दरिध्वरितारः	दरिध्वरितास्थ	दरिध्वरितास्मः

लृट्

	प्र०	म०	उ०
ए०	दरिध्वरिष्यति	दरिध्वरिष्यसि	दरिध्वरिष्यामि
द्वि०	दरिध्वरिष्यतः	दरिध्वरिष्यथः	दरिध्वरिष्यावः
ब०	दरिध्वरिष्यन्ति	दरिध्वरिष्यथ	दरिध्वरिष्यामः

लोट्

	प्र०	म०	उ०
ए०	दरिध्वरीतु-दरिध्वर्तु-तात्	दरिध्वृहि-दरिध्वर्षात्	दरिध्वराणि-दरिध्वर्मि
द्वि०	दरिध्वृतां	दरिध्वृतं	दरिध्वराव
ब०	दरिध्वतु	दरिध्वृत	दरिध्वराम

लङ्

	प्र०	म०	उ०
ए०	अधरिध्वरीत्	अधरिध्वरीः—अधरिध्वः	अधरिध्वरीमि—अधरिध्वर्मि
द्वि०	अधरिध्वृतां	अधरिध्वृतं	अधरिध्वृव
ब०	अधरिध्वरुः	अधरिध्वृत	अधरिध्वृम

विधिलिङ्

	प्र०	म०	उ०
ए०	दरिध्वृयात्	दरिध्वृयाः	दरिध्वृयां
द्वि०	दरिध्वृयातां	दरिध्वृयातं	दरिध्वृयाव
ब०	दरिध्वृयुः	दरिध्वृयात	दरिध्वृयाम

आशीर्लिङ्

	प्र०	म०	उ०
ए०	दरिध्रियात्	दरिध्रियाः	दरिध्रियासं

आशीर्लिङ्

	प्र॰	म॰	उ॰
द्वि॰	दरिध्रियास्तां	दरिध्रियास्तं	दरिध्रियास्व
ब॰	दरिध्रियासुः	दरिध्रियास्त	दरिध्रियास्म

लुङ्

	प्र॰	म॰	उ॰
ए॰	अदरिध्वरीत्	अदरिध्वरीः	अदरिध्वरिषं
द्वि॰	अदरिध्वरिष्टां	अदरिध्वरिष्टं	अदरिध्वरिष्व
ब॰	अदरिध्वरिषुः	अदरिध्वरिष्ट	अदरिध्वरिष्म

लृङ्

	प्र॰	म॰	उ॰
ए॰	अदरिध्वरिष्यत्	अदरिध्वरिष्यः	अदरिध्वरिष्यं
द्वि॰	अदरिध्वरिष्यतां	अदरिध्वरिष्यतं	अदरिध्वरिष्याव
ब॰	अदरिध्वरिष्यन्	अदरिध्वरिष्यत	अदरिध्वरिष्याम

धस्थैर्ये- ध्ववति-

धिष-शब्दे- श्लुः छां० दिधेष्ठि-दिधिष्ठः-दिधिषति-

धन-धान्ये- छां० दधंति-दधंतः-दधनति-दधान

धुञ्-कंपने-श्नुः- लट् लिट् लुट् लृट् लोट्

प्र॰ ए॰ धुनोति दुधाव धोता धोष्यति धुनोतु-तात्

लुङ् अधौषीत्-

धूञ्-कंपने- धूनोति-

धूञ्-इत्यपि- धूनोति

ञिधृषा-प्रागल्भ्ये-धृष्णोति-

धुड-संवरणे शः धुडति-दुधोड-धोडिता

धू-विधूनने-धुवति-धविता-अधावीत्-

श्लोकं

धूनोतिचंपकवनानिधुनोत्यशोकं चूतंधूनाति धुवतिस्फुटितातिमुक्तं ।
वायुर्विधूनयतिचंपकपुष्परेणूनयत्काननेधववति चंपकमंजरीश्च ॥ १ ॥

धृ-गतिस्थैर्ययोः-ध्रुवति-ध्रुवइतिपाठान्तरं
धि-धारणे-धीयति-धेता-अधाषीत्- इतिशः अथ श्ना-
धृ-वयोहानौ- धृणाति लिट्-दधार
उध्रस-उंछे-ध्रस्नाति-उध्रस्नाति-उध्रसांचकार
धक्क-नाशने-णिच् धक्कयति-धक्कयामास
धूस-कांतिकरणे-धूसयति-धूसयांचकार
धूष-इत्येके-धूशइत्यपरे-धूषयति-धूशयति
धृष-प्रसहने-धर्षयति-धर्षयामास-इतिस्वार्थेणिच्

अथ धकाराद्यात्मनेपदानि ।

धेक्ष-शब्दोत्साहयोः धेक्षते-दिधेक्षे-शेषं-धेक्षधातुवत्
धाघृ-सामर्थ्ये-धाघते-शेषंधाघृधातुवत्
धाढ्ट-विशरणे-धाढते-शेषंपूर्वधातुवत्
धाव्-गतिशुध्योः धावते-शेषपूर्ववत्
धुक्ष-संदीपनक्लेशनजीवनेषु-धुक्षते-शेषंपूर्ववत्
धिक्ष-संदीपनक्लेशनजीवनेषु-धिक्षते-शेषंपूर्ववत्

ध्वंस-अवस्त्रंसने-लट् लिट् लुट् लृट् लोट्

	लट्	लिट्	लुट्	लृट्	लोट्
प्र॰ ए॰	ध्वंसते	दध्वंसे	ध्वंसिता	ध्वंसिष्यते	ध्वंसतां

लङ्	विधिलिङ्	आशीर्लिङ्	लुङ्	लृङ्
अध्वंसत	ध्वंसीत	ध्वंसिसीष्ट	अध्वंसिष्ट	अध्वंसिष्यत

ध्वंसु-गतौ-ध्वंसते-शेषंपूर्ववत्

धञ्-धारणे- लट्

	प्र॰	म॰	उ॰
ए॰	धरते	धरसे	धरे
द्वि॰	धरेते	धरेथे	धरावहे
ब॰	धरंते	धरध्वे	धरामहे

लिट्

	प्र॰	म॰	उ॰
ए॰	दध्रे	दध्रिषे	दध्रे
द्वि॰	दध्राते	दध्राथे	दध्रिवहे
ब॰	दध्रिरे	दध्रिध्वे	दध्रिमहे

लुट्

	प्र॰	म॰	उ॰
ए॰	धर्ता	धर्तासे	धर्ताहे
द्वि॰	धर्तारौ	धर्तासाथे	धर्तास्वहे
ब॰	धर्तारः	धर्ताध्वे	धर्तास्महे

लृट्

	प्र॰	म॰	उ॰
ए॰	धरिष्यते	धरिष्यसे	धरिष्ये
द्वि॰	धरिष्येते	धरिष्येथे	धरिष्यावहे
ब॰	धरिष्यन्ते	धरिष्यध्वे	धरिष्यामहे

लोट्

	प्र॰	म॰	उ॰
ए॰	धरतां	धरस्व	धरै
द्वि॰	धरेतां	धरेथां	धरावहै
ब॰	धरन्तां	धरध्वं	धरामहै

लङ्

	प्र॰	म॰	उ॰
ए॰	अधरत	अधरथाः	अधरे
द्वि॰	अधरेताः	अधरेथां	अधरावहि
ब॰	अधरन्त	अधरध्वं	अधरामहि

विधिलिङ्

	प्र॰	म॰	उ॰
ए॰	धरेत	धरेथाः	धरेय
द्वि॰	धरेयातां	धरेयाथां	धरेवहि
ब॰	धरेरन्	धरेध्वं	धरेमहि

आशीर्लिङ्

	प्र॰	म॰	उ॰
ए॰	धृषीष्ट	धृषीष्ठाः	धृषीय
द्वि॰	धृषीयास्तां	धृषीयास्थां	धृषीवहि
ब॰	धृषीरन्	धृषीध्वं	धृषीमहि

लुङ्

	प्र॰	म॰	उ॰
ए॰	अधृत	अधृथाः	अधृषि

लुङ्

	प्र॰	म॰	उ॰
द्वि॰	अधृषातां	अधृषाथां	अधृष्वहि
ब॰	अधृषत	अधृढ्वं	अधृष्महि

लृङ्

	प्र॰	म॰	उ॰
ए॰	अधरिष्यत	अधरिष्यथाः	अधरिष्ये
द्वि॰	अधरिष्येतां	अधरिष्येथां	अधरिष्यावहि
ब॰	अधरिष्यन्त	अधरिष्यध्वं	अधरिष्यामहि

धृङ्—अवध्वंसने इतिशप्

धीङ्—आधारे श्यन्

	लट्	लिट्	लुट्	लृट्
प्र॰ ए॰	धीयते	दिधीये	धेता	धेष्यते

	लुङ्	लृङ्
प्र॰ ए॰	अधीष्ट	अधेष्यत

धुरी—हिंसागत्योः—

	लट्	लिट्	लुट्	लृट्	लुङ्
प्र॰ ए॰	धूर्यते	दुधूरे	धूरिता	धूरिष्यते	अधूरिष्ट

धृङ्—अवस्थाने—शः—

	लट्	लिट्	लुट्	लृट्	लोट्
प्र॰ ए॰	ध्रियते	दध्रे	धर्ता	धरिष्यते	ध्रियतां

	लङ्	विधिलिङ्	आशीर्लिङ्	लुङ्	लृङ्
प्र॰ ए॰	अध्रियत	ध्रियेत	धृषीष्ट	अधृत	अधरिष्यत

धूञ्—कंपने—लट धुनीते—धुनाति— लिट दुधाव

स्वार्थणिच्—धूपभाषार्थः—धूपयते

धूञ्—कंपने—धूनयते—धूनयति—धावयति—इतिकेचित्

ध्वन—शब्दे—

	लट्	लिट्	लुट्	लुङ्
प्र॰ ए॰	ध्वनयते	ध्वनयांचक्रे	ध्वनयिता	अदिध्वनत

धेक—दर्शनइत्येके—

	लट्	लुङ्	लृङ्
प्र॰ ए॰	धेकयते	अदिधेकत	अधेकयिष्यत

अथ नकाराद्यात्मनेपदानि ।

नाधृ—याच्ञोपतापैश्वर्याशीष्षु शप्

	लट्	लिट्	लुट्	लृट्	लोट्	लङ्
प्र॰ ए॰	नाधते	ननाधे	नाधिता	नाधिष्यते	नाधतां	अनाधत

विधिलिङ् आशीर्लिङ् लुङ् लृङ्
प्र· ए· नाधेत नाधिषीष्ट अनाधिष्ट अनाधिष्यत—शेषंगाधृवत्

नाधृ—याच्ञोपतापैश्वर्याशीष्षु—नाधते—शेषंपूर्ववत्

नाधृ—धातोराशिष्येवात्मनेपदं—अन्यत्र नाधति—अवशिष्टानिपूर्ववत्

नट—नृत्तौ—नताविल्येके—गताविल्यन्ये—नटते

ष्णष्ट—भये लट् लिट् लुट् लृट् लोट् लङ्
प्र· ए· नेषते निनेषे नेषिता नेषिष्यते नेषतां अनेषत

विधिलिङ् आशीर्लिङ् लुङ् लृङ्
प्र· ए· नेषेत नेषिषीष्ट अनेषिष्ट अनेषिष्यत

णास्र—शब्दे लट् लिट् लुङ् लृङ्
प्र· ए· नासते ननासे अनासिष्ट अनासिष्यत

अथस्वार्थेणिच्

नड—भाषार्थः लट् लिट् लुट् लृट्
प्र· ए· नाडयते नाडयांचक्रे नाडयिता नाडयिष्यते

लोट् लङ् लिङ् आशीर्लिङ् लुङ्
प्र· ए· नाडयतां अनाडयत नाडयेत नाडयिषीष्ट अनीनडत

लृङ् अनाडयिष्यत

निवास—आच्छादने लट् लिट् लुङ्
प्र· ए· निवासयते निवासयांचक्रे अनिनिवासित

लृङ् अनिवासयिष्यत

निकेत—श्रावणे—निमंत्रणेच—निकेतयते अनीनिकेतत अनिकेतयिष्यत

अथ नकारादिपरस्मैपदानि ।

नर्द—शब्दे

लट्

	प्र·	म·	उ·
ए·	नर्दति	नर्दसि	नर्दामि

लिट्

	प्र·	म·	उ·
ए·	ननर्द	ननर्दिथ	ननर्द

लुट् लृट् लोट् लङ् लिङ्
प्र· ए· नर्दिता नर्दिष्यति नर्दतु—नर्दतात् अनर्दत् नर्देत्

आशीर्लिङ् लुङ् लृङ्
प्र· ए· नर्द्यात् अनर्दीत् अनर्दिष्यत्

नर्द—धातोर्हेतुमण्णिच् लट् लिट् लुट् लृट्
प्र· ए· नर्दयति-नर्दयते नर्दयामास नर्दयिता नर्दयिष्यति-नर्दयिष्यते
लोट् लङ्
प्र· ए· नर्दयतु—नर्दयतां—नर्दयतात् अनर्दयत्—अनर्दयत—
आशीर्लिङ् लुङ् लृङ्
प्र· ए· नर्द्यात्—नर्दयिषीष्ट अननर्दत्—अननर्दत अनर्दयिष्यत् }
अनर्दयिष्यत }

नर्द—धातोस्सन्— लट् लिट् लुट् लृट्
प्र· ए· निनर्दिषति निनर्दिषामास निर्नर्दिषिता निनर्दिषिष्यति
लोट् लङ् लिङ्
प्र· ए· निनर्दिषतु—निनर्दिषतात् अनिनर्दिषत् अनिनर्दिषेत्
आशीर्लिङ् लुङ् लृङ्
प्र· ए· निनर्दिष्यात् अनिनर्दिषीत् अनिनर्दिषिष्यत्

नर्द—धातोर्यङ् लट् लिट् लुट् लृट्
प्र· ए· नानर्द्यते नानर्दांचक्रे नानर्दिता नानर्दिष्यते
लोट् लङ् लिङ् आशीर्लिङ्
प्र· ए· नानर्द्यतां अनानर्द्यत नानर्द्येत नानर्दिषीष्ट
लुङ् अनानर्दिष्ट लृङ् अनानर्दिष्यत

नर्द—धातोर्यङ् लुक्-लट् लिट् लुट् लृट्
प्र· ए· नानर्दीति नानर्दामास नानर्दिता नानर्दिष्यति
लोट् लङ्
प्र· ए· नानर्दतु—नानर्दतात्—नानर्द अनानर्दीत् अनानर्त
लिङ् आशीर्लिङ् लुङ् लृङ्
प्र· ए· नानर्द्यात् नानर्द्यात् अनानर्दीत् अनानर्दिष्यत्

टु—नदिसमृद्धौ— लट् लिट् लुट् लृट् लोट्
प्र· ए· नंदति— ननंद नंदिता नंदिष्यति नंदतु—नंदतात्
लङ् लिङ् आशीर्लिङ् लुङ् लृङ्
प्र· ए· अनंदत् नंदेत् नंद्यात् अनंदीत् अनंदिष्यत्

नदि—धातोर्हेतुमण्णिच्-लट् सन् यङ्
प्र· ए· नंदयति—नंदयते निनंदिषति नानंद्यते
यङ् लुक् नानंदीति—नानंत्ति

णील-वर्णे— लट् हेतुमण्णिच्- सन्
प्र ए· नीलति नीलयति—नीलयते निनीलिषति
यङ् यङ् लुक्
प्र· ए· नेनील्यते नेनीलीति—नेनिन्ति—

णीव-स्थौल्ये लट् हेतुमण्णिच सन् यङ्
प्र· ए· नीवति नीवयति—नीवयते निनीविषति नेनीव्यते
यङ् लुक् नेनीवीति—नेनेत्ति

णिवि-सेचने शप्- लट् हेतुमण्णिच् सन्
प्र· ए· निन्वति निन्वयति—निन्वयते निनिन्विषति
यङ् यङ् लुक्
प्र· ए· नेनिन्व्यते नेनिन्वीति—नेनिन्ति

णक्ष-गतौ— लट् हेतुमण्णिच् सन् यङ्
प्र· ए· नक्षति नक्षयति—नक्षयते निनक्षिषति नानक्ष्यते
यङ् लुक् नानक्षीति—नानष्टि—

णख-णखि-गत्यर्थौ—लट् हेतुमण्णिच् सन्
प्र· ए· नखति— नखयति—नखयते निनखिषति
यङ् यङ् लुक्
प्र· ए· नानख्यते— नानखीति—नानक्ति

नॄ—नये— लट् हेतुमण्णिच्
प्र· ए· नरति नारयति—नयांदन्यत्र—नरयति—नरयते
सन् यङ् यङ् लुक्
प्र· ए· निनीर्षति—नानर्यते नानरीति—नानर्ति

णल-गंधे— लट् हेतुमण्णिच् सन्
प्र· ए· नलति नालयति—नालयते निनलिषति
यङ् यङ् लुक्
प्र· ए· नानल्यते नानलीति—नानल्ति—

णिदृ—णेदृ—कुत्साऽसंनिकर्षयोः लट् हेतुमण्णिच्
प्र· ए· नेदति— नेदयति—नेदयते
सन् यङ् यङ् लुक्
प्र· ए· निनेदिषति नेनिद्यते नेनिदीति—नेनेत्ति—नेनेद्यते—नेनेदीति

णीञ्-प्रापणे— लट् हेतुमण्णिच् सन् यङ्
प्र· ए· नयति—नयते नाययति—नाययते निनीषति नेनीयते
यङ् लुक् नेनयीति—नेनेत्ति

णु–स्तुतौ–लुक्–

	लट्	लिट्	लुट्	लृट्	लोट्
प्र· ए·	नौति	नुनाव	नविता	नविष्यति	नौतु–नुतात्

	लङ्	लिङ्	आशीर्लिङ्	लुङ्	लृङ्
प्र· ए·	अनौत्	नुयात्	नूयात्	अनावीत्	अनविष्यत्

णिजिर्–शौचपोषणयोः श्लुः

लट्

	प्र·	म·	उ·
ए·	नेनेक्ति	नेनेक्षि	नेनेज्मि
द्वि·	नेनिक्तः	नेनिक्थः	नेनिज्वः
ब·	नेनिजति	नेनिक्थ	नेनिज्मः

लिट्

	प्र·	म·	उ·
ए·	निनेज	निनेजिथ	निनेज
द्वि·	निनिजतुः	निनिजथुः	निनिजिव
ब·	निनिजुः	निनिज	निनिजिम

लुट्

	प्र·	म·	उ·
ए·	नेक्ता	नेक्तासि	नेक्तास्मि
द्वि·	नेक्तारौ	नेक्तास्थः	नेक्तास्वः
ब·	नेक्तारः	नेक्तास्थ	नेक्तास्मः

लृट्

	प्र·	म·	उ·
ए·	नेक्ष्यति	नेक्ष्यसि	नेक्ष्यामि
द्वि·	नेक्ष्यतः	नेक्ष्यथः	नेक्ष्यावः
ब·	नेक्ष्यन्ति	नेक्ष्यथ	नेक्ष्यामः

लोट्

	प्र·	म·	उ·
ए·	नेनेक्तु–नेनिक्तात्	नेनिग्धि–नेनिक्तात्	नेनिजानि
द्वि·	नेनिक्तां	नेनिक्तं	नेनेजाव
ब·	नेनिजतु	नेनिक्त	नेनेजाम

लङ्

	प्र·	म·	उ·
ए·	अनेनेक्–अनेनेग्	अनेनेक्–अनेनेग्	अनेनेजं
द्वि·	अनेनिक्तां	अनेनिक्तं	अनेनिज्व
ब·	अनेनिजुः	अनेनिक्त	अनेनिज्म

विधिलिङ्

	प्र॰	म॰	उ॰
ए॰	नेनिज्यात्	नेनिज्याः	नेनिज्यां
द्वि॰	नेनिज्यातां	नेनिज्यातं	नेनिज्याव
ब॰	नेनिज्युः	नेनिज्यात	नेनिज्याम

आशीर्लिङ्

	प्र॰	म॰	उ॰
ए॰	निज्यात्	निज्याः	निज्यासं
द्वि॰	निज्यास्तां	निज्यास्तं	निज्यास्व
ब॰	निज्यासुः	निज्यास्त	निज्यास्म

लुङ्

	प्र॰	म॰	उ॰
ए॰	अनिजत्—अनैक्षीत्	अनिजः—अनैक्षीः	अनिजं—अनैक्षं
द्वि॰	अनिजतां—अनैक्तां	अनिजतं—अनैक्तं	अनिजाव—अनैक्ष्व
ब॰	अनिजन्—अनैक्षुः	अनिजत—अनैक्त	अनिजाम—अनैक्ष्म

लृङ्

	प्र॰	म॰	उ॰
ए॰	अनेक्ष्यत्	अनेक्ष्यः	अनेक्ष्यं
द्वि॰	अनेक्ष्यतां	अनेक्ष्यतं	अनेक्ष्याव
ब॰	अनेक्ष्यन्	अनेक्ष्यत	अनेक्ष्याम

आत्मनेपदरूपाणि—नेनिक्ते—निनिजे—नेक्ष्यते—नेनिजीत
निक्षीष्ट—अनिक्त

नृती—गात्रविक्षेपे—श्यन् लट् लिट् लृट् लोट्
प्र॰ ए॰ नृत्यति ननर्त नर्तिष्यति नृत्यतु
लुङ् अनर्तीत्— लङ् अनर्तिष्यत्—

नॄ—नये—श्ना— नृणाति
नभ—हिंसायां— नभ्नाति
स्वार्थणिच्— नट—अवस्यंदने— नाटयति
नक्क—नाशने— नक्कयति
निवास—आच्छादने— निवासयति— अनिनिवासत्
कंड्वादि—नच— दास्यइत्येके

इति नकारादयः ।

अथ पकारादिआत्मनेपदानि ।

पर्द–कुत्सितेशब्दे– शप्– लट्

	प्र०	म०	उ०
ए०	पर्दते	पर्दसे	पर्दे
द्वि०	पर्देते	पर्देथे	पर्दावहे
ब०	पर्दन्ते	पर्दध्वे	पर्दामहे

लिट्

	प्र०	म०	उ०
ए०	पपर्दे–	पपर्दिषे	पपर्दे
द्वि०	पपर्दाते	पपर्दाथे	पपर्दिवहे
ब०	पपर्दिरे	पपर्दिध्वे	पपर्दिमहे

लुट्

	प्र०	म०	उ०
ए०	पर्दिता	पर्दितासे	पर्दिताहे
द्वि०	पर्दितारौ	पर्दितासाथे	पर्दितास्वहे
ब०	पर्दितारः	पर्दिताध्वे	पर्दितास्महे

लृट्

	प्र०	म०	उ०
ए०	पर्दिष्यते	पर्दिष्यसे	पर्दिष्ये
द्वि०	पर्दिष्येते	पर्दिष्येथे	पर्दिष्यावहे
ब०	पर्दिष्यन्ते	पर्दिष्यध्वे	पर्दिष्यामहे

लोट्

	प्र०	म०	उ०
ए०	पर्दतां	पर्दस्व	पर्दै
द्वि०	पर्देतां	पर्देथां	पर्दावहै
ब०	पर्दन्तां	पर्दध्वं	पर्दामहै

लङ्

	प्र०	म०	उ०
ए०	अपर्दत	अपर्दथाः	अपर्दे
द्वि०	अपर्देतां	अपर्देथां	अपर्दावहि
ब०	अपर्दन्त	अपर्दध्वं	अपर्दामहि

विधिलिङ्

	प्र॰	म॰	उ॰
ए॰	पर्देत	पर्देथाः	पर्देय
द्वि॰	पर्देयातां	पर्देयाथां	पर्देवहि
ब॰	पर्देरन्	पर्देध्वं	पर्देमहि

आशीर्लिङ्

	प्र॰	म॰	उ॰
ए॰	पर्दिषीष्ट	पर्दिषीष्ठाः	पर्दिषीय
द्वि॰	पर्दिषीयास्तां	पर्दिषीयास्थां	पर्दिषीवहि
ब॰	पर्दिषीरन्	पर्दिषीध्वं	पर्दिषीमहि

लुङ्

	प्र॰	म॰	उ॰
ए॰	अपर्दिष्ट	अपर्दिष्ठाः	अपर्दिषि
द्वि॰	अपर्दिषातां	अपर्दिषाथां	अपर्दिष्वहि
ब॰	अपर्दिषत	अपर्दिध्वं	अपर्दिष्महि

लृङ्

	प्र॰	म॰	उ॰
ए॰	अपर्दिष्यत	अपर्दिष्यथाः	अपर्दिष्ये
द्वि॰	अपर्दिष्येतां	अपर्दिष्येथां	अपर्दिष्यावहि
ब॰	अपर्दिष्यन्त	अपर्दिष्यध्वं	अपर्दिष्यामहि

पचि—विस्तारवचने— पंचते— शेषंकचिधातुवत्
पिडि—संघाते— पिंडते— शेषंचदिधातुवत्
पडि—गतौ— पंडते— शेषंपूर्ववत्
पण—व्यवहारे—स्तुतौच—पणते शेषंककधातुवत्
पन—स्तुतौ— पनते— शेषंपूर्ववत्
पय—गतौ— पयते— शेषंचयधातुवत्
पूयी—विशरणेदुर्गंधेच— पूयते— शेषंक्नूयीधातुवत्

ओप्यायी—वृद्धौ

लट्

	प्र॰	म॰	उ॰
ए॰	प्यायते	प्यायसे	प्याये
द्वि॰	प्यायेते	प्यायेथे	प्यायावहे
ब॰	प्यायन्ते	प्यायध्वे	प्यायामहे

लिट्

	प्र॰	म॰	उ॰
ए॰	पिप्ये	पिप्यषे	पिप्ये
द्वि॰	पिप्याते	पिप्याथे	पिप्यिवहे
ब॰	पिप्यिरे	पिप्यिध्वे	पिप्यिमहे

	लुट्	लृट्	लोट्	लङ्	विधिलिङ्
प्र॰ ए॰	प्यायिता	प्यायिष्यते	प्यायतां	अप्यायत	प्यायेत

	आशीर्लिङ्	लुङ्	लृङ्
प्र॰ ए॰	प्यायिषीष्ट	अप्यायिष्ट	अप्यायिष्यत

पेवृ—निपातने— पेवते— शेषंतेपृधातुवत्

प्लेवृ—सेवने— प्लेवते— शेषंपूर्ववत्

प्रेष्ट—प्रयत्ने— प्रेषते— शेषंपूर्ववत्

प्लिह—गतौ— प्लेहते— अवशिष्टान्यूह्यानि

प्रथ—प्रख्याने— प्रथते— शेषंपूर्ववत्

प्रस—विस्तारे— प्रसते— शेषंपूर्ववत्

प्रोथृ—पर्याप्तौ— प्रोथते— अवशिष्टानिपूर्ववत्

प्रुङ्-गतौ-	लट्	हेतुमरिणच्	लुङ्
	प्र॰ ए॰ प्रवते—	प्रावयति—प्रावयते	अपुप्रवत—अपुप्रवत्

प्रुङ्धातोर्यङ्	यङ् लुक्
पोप्रूयते—	पोप्रवीति—पोप्रोति—

प्लुङ्-गतौ-	लट्	लिट	णिच्	सन्
प्र॰ ए॰	प्लवते	पुप्लुवे	प्लावयते	पुप्लविषते—पुप्लविषति

प्लुङ्-धातोर्यङ्	लट्	यङ् लुक्-लट्
प्र॰ ए॰	पोप्लूयते	पोप्लवीति—पोप्लोति

पूङ्-पवने-शप्	लट्	हेतुमरिणच्	सन्
प्र॰ ए॰	पवते	पावयति—पावयते	पिपविषति
यङ्	पोपूयते—	लुक् यङ्	पोपवीति—पोपोति

प्यैङ्-वृद्धौ-	लट्	लिट्	लुट्	लृट्	लोट्	लङ्
प्र॰ ए॰	प्यायते—	पप्ये	प्याता	प्यास्यते	प्यायतां	अप्यायत

	लिङ्	आशीर्लिङ्	लुङ्	लृङ्
प्र॰ ए॰	प्यायेत	प्यायिषीष्ट	अप्यायस्त	अप्यायिष्यत

पुपुल्— पतिता

डुपचल्—पाके—पेचिता

पपक्य—पेचे—पक्ता—पक्षीष्ट—अ.क्ता—अपचातां

पिजि-वर्णे-लुक् संपर्चनइत्येके उभयत्रेत्यन्ये अवयवेइत्यपरे अव्यक्तशब्देइतीतरेपृजीत्येके–

	लट्	लिट्	लुट्	लृट्	लोट्	लङ्
प्र· ए·	पिङ्क्ते	पिपिंजे	पिंजिता	पिंजिष्यते	पिङ्क्तां	अपिङ्क्त

	विधिलिङ्	आशीर्लिङ्	लुङ्	लृङ्
प्र· ए·	पिंजीत	पिंजिषीष्ट	अपिंजिष्ट	अपिंजिष्यत

पृजि–संवर्चने–पृक्ते–शेषंपूर्ववत्

पृची–संवर्चने–पृक्ते–

पीङ्–पालने–श्यन्– लट् पीयते–पिप्ये

प्रीङ्–प्रीतौ–प्रीयते–पिप्रिये

पूरी–आप्यायने–पूर्यते–अपूरि–अपूरिष्ट

पद–गतौ–पेदे–पत्ता–पत्सीष्ट–अपादि–अपत्सातां

पृङ्–व्यायामे–शः प्रियते–पप्रे–अपृत

प्रीञ्–तर्पणेकांतौच–श्ना–प्रीणीते–प्रीणाति

पूञ्–पवने–पुनीते–पुनाति

पुङ्–संभक्तौ–पृणीते

पश–बंधने-स्वार्थणिच्-	लट्	लिट्	लुङ्	लृङ्
प्र· ए·	पाशयते	पाशयांचक्रे	अपीशत	अपाशयिष्यत

पुषधारणे–	लट्-	लुङ्	लृङ्
प्र· ए·	पोषयते	अपूपुषत	अपोषयिष्यत

पट–भाषार्थः–पाटयते– अपीपटत अपाटयिष्यत

पुट–भाषार्थः–पोटयते– अपूपुटत अपोटयिष्यत

पिजि–भाषार्थः–पिंजयते अपिपिंजत–अपिंजयिष्यत

पिसि–भाषार्थः–पिंसयते

पुट–भाषार्थः– पुंटयते

पूरी–आप्यायने- लट् पूरयते–

पच–संयमने- लट् पचंयते

प्रीञ्–तर्पणे- लट् प्रीणते

पट–ग्रंथे- लट् पटयते लुङ् अपपटत

पत–गतौ–वाणिजंतः–पतयते–अपपतत

पद–गतौ–पदयते लुङ् अपपदत

पार—कर्मसमाप्तौ लट् पारयते—

पुट—संसर्गे—पुटयते—

पर्ण—हरितभावे—पर्णयते—

पुधि—हिंसासंक्लेशनयोः लट्

	प्र॰	म॰	उ॰
ए॰	पुंधति	पुंधसि	पुंधामि
द्वि॰	पुंधतः	पुंधथः	पुंधावः
ब॰	पुंधन्ति	पुंधथ	पुंधामः

लिट्

	प्र॰	म॰	उ॰
ए॰	पुपुंध	पुपुंधित	पुपुंध
द्वि॰	पुपुंधथुः	पुपुंधथुः	पुपुंधिव
ब॰	पुपुंधुः	पुपुंध	पुपुंधिम

लुट्

	प्र॰	म॰	उ॰
ए॰	पुंधिता	पुंधितासि	पुंधितास्मि
द्वि॰	पुंधितारौ	पुंधितास्थः	पुंधितास्वः
ब॰	पुंधितारः	पुंधितास्थ	पुंधितास्मः

लृट्

	प्र॰	म॰	उ॰
ए॰	पुंधिष्यति	पुंधिष्यसि	पुंधिष्यामि
द्वि॰	पुंधिष्यतः	पुंधिष्यवः	पुंधिष्यावः
ब॰	पुंधिष्यन्ति	पुंधिष्यथ	पुंधिष्यामः

लोट्

	प्र॰	म॰	उ॰
ए॰	पुंधतु-पुंधतात्	पुंध—पुंधतात्	पुंधानि
द्वि॰	पुंधतां	पुंधतं	पुंधाव
ब॰	पुंधन्तु	पुंधत	पुंधाम

लङ्

	प्र॰	म॰	उ॰
ए॰	अपुंधत्	अपुंधः	अपुंधं
द्वि॰	अपुंधतां	अपुंधतं	अपुंधाव
ब॰	अपुंधन्	अपुंधत	अपुंधाम

विधिलिङ्

	प्र॰	म॰	उ॰
ए॰	पुंधेत्	पुंधेः	पुंधेयं
द्वि॰	पुंधेतां	पुंधेतं	पुंधेव
ब॰	पुंधेयुः	पुंधेत	पुंधेम

आशीर्लिङ्

	प्र॰	म॰	उ॰
ए॰	पुंध्यात्	पुंध्याः	पुंध्यासं
द्वि॰	पुंध्यास्तां	पुंध्यास्तं	पुंध्यास्व
ब॰	पुंध्यासुः	पुंध्यास्त	पुंध्यास्म

लुङ्

	प्र॰	म॰	उ॰
ए॰	अपुंधीत्	अपुंधीः	अपुंधिषं
द्वि॰	अपुंधिष्टां	अपुंधिष्टं	अपुंधिष्व
ब॰	अपुंधिषुः	अपुंधिष्ट	अपुंधिष्म

लृङ्

	प्र॰	म॰	उ॰
ए॰	अपुंधिष्यत्	अपुंधिष्यः	अपुंधिष्यं
द्वि॰	अपुंधिष्यतां	अपुंधिष्यतं	अपुंधिष्यावः
ब॰	अपुंधिष्यन्	अपुंधिष्यत	अपुंधिष्याम

पुधि-धातोर्हेतुमण्णिच् — लट् प्र॰ ए॰ पुंधयति–पुंधयते, लिट् पुंधयामास, लुट् पुंधयिता

लृट् प्र॰ ए॰ पुंधयिष्यति–पुंधयिष्यते, लोट् पुंधयतु–पुंधयतात्, लङ् अपुंधयत्

विधिलिङ् प्र॰ ए॰ पुंधयेत्–पुंधयेत, आशीर्लिङ् पुंध्यात्, लुङ् अपुपुंधत्, लृङ् अपुंधयिष्यत्–त

पुधि-धातोस्सन्- लट् प्र॰ ए॰ पुपुंधिषति, लिट् पुपुंधिषामास, लुट् पुपुंधिषिता, लृट् पुपुंधिषिष्यति

लोट् प्र॰ ए॰ पुपुंधिषतु, लङ् अपुपुंधिषत्, लिङ् पुपुंधिषेत्, आशीर्लिङ् पुपुंधिष्यात्

लुङ् प्र॰ ए॰ अपुपुंधिषीत्, लृङ् अपुपुंधिषिष्यत्

पुधि-धातोर्यङ्- लट् लिट् लुट् लृट्
प्र· ए· पोपुंध्यते पोपुंधांचक्रे पोपुंधिता पोपुंधिष्यते
लोट् लङ् लिङ् आशीर्लिङ्
प्र· ए· पोपुंध्यतां अपोपुंध्यत पोपुंध्येत पोपुंधिषीष्ट
लुङ् लृङ्
प्र· ए· अपोपुंधिष्ट अपोपुंधिष्यत

पुधि-धातोर्यङ् लुक्- लट् लिट् लुट्
प्र· ए· पोपुंधीति—पोपुंत्ति पोपुंधांचकार पोपुंधिता
लृट् लोट् लङ्
प्र· ए· पोपुंधिष्यति पोपुंधीतु—पोपुंत्तु—पोपुंध्यात् अपोपुंधीत् —ध्
लिङ् आशीर्लिङ् लुङ् लृङ्
प्र· ए· पोपुंध्यात् पोपुंध्यात् अपोपुंधीत् अपोपुंधिष्यत्

पट-गतौ शप्- लट् हेतुमण्णिच् सन् यङ्
प्र· ए· पटति पाटयति—पाटयते पिपटिषति पापट्यते
यङ् लुक्- पापटीति—पापट्टि

पिट-शब्दसंघातयोः लट् हेतुमण्णिच् सन्
प्र· ए· पेटति पेटयति—पेटयते पिपेटिषति—पिपिटिषति
यङ् यङ् लुक्
प्र· ए· पेपिट्यते— पेपिटीति—पेपेट्टि

पुट-मर्दने- लट् हेतुमण्णिच् सन्
प्र· ए· पोटति— पोटयति—पोटयते पुपुटिषति—पुपोटिषति
यङ् यङ् लुक्
प्र· ए· पोपुट्यते— पोपुटीति—पोपोट्टि—

पुडि-खंडने- पुं लट् हेतुमण्णिच् सन् यङ्
प्र· ए· पुंडति— पुंडयति—पुंडयते पुपुंडिषति पोपुंड्यते
यङ् लुक्- पोपुंडीति—पोपुंड्डि—

पठ-व्यक्तायांवाचि— लट् हेतुमण्णिच् सन्—
प्र· ए· पठति पाठयति—पाठयते पिपठिषति
यङ् यङ् लुक्
प्र· ए· पापठ्यते पापठीति—पापट्ठि

पिठ–हिंसासंक्लेशनयोः शप्–लट् हेतुमण्णिच् सन्
प्र· ए· पेठति— पेठयति–पेठयते पिपेठिषति

यङ् यङ् लुक्–
प्र· ए· पेपिठ्यते पेपिठीति–पेपेट्टि–

पर्व–गतौ– लट् हेतुमण्णिच् सन् यङ्
प्र· ए· पर्वति पर्वयति–पर्वयते पिपर्विषति पापर्व्यते
यङ् लुक्– पापर्वीति–पापर्विति

पैणृ–गतिप्रेषणश्लेषणेषु– लट् हेतुमण्णिच् सन्
प्र· ए· पैणति पैणयति–पैणयते पिपैणिषति

यङ् यङ् लुक्
प्र· ए· पेपैण्यते पेपैणीति–पेपैणित–

पील–प्रतिष्टंभे– लट् हेतुमण्णिच् सन्
प्र· ए· पीलति पीलयति–पीलयते पिपीलिषति

यङ् यङ् लुक्
प्र· ए· पेपील्यते— पेपीलीति–पेपील्ति

पुल–संघाते– लट् हेतुमण्णिच् सन्
प्र· ए· पूलति पूलयति–पूलयते पुपूलिषति

यङ् यङ् लुक्
प्र· ए· पोपूल्यते पोपूलीति–पोपूल्ति

पेल–गतौ– लट् हेतुमण्णिच् सन् यङ्
प्र· ए· पेलति पेलयति–पेलयते पिपेलिषति पेपेल्यते
यङ् लुक्–पेपेलीति–पेपेल्ति

पीव–स्थौल्ये लट् हेतुमण्णिच् सन् यङ्
प्र· ए· पीवति पीवयति–पीवयते पिपीविषति–पेपीव्यते
यङ् लुक्– पेपेवीति–पेपीत्ति–

पुर्व–पूरणे– लट् हेतुमण्णिच् सन् यङ्
प्र· ए· पूर्वति पूर्वयति–पूर्वयते पुपूर्विषति–पोपूर्व्यते
यङ् लुक्– पोपूर्वीति–पोपूर्त्ति –

पर्व–पूरणे– लट् हेतुमण्णिच्– सन् यङ्
प्र· ए· पर्वति– पर्वयति–पर्वयते पिपर्विषति पापर्व्यते–
यङ् लुक्– पापर्वीति–पापर्त्ति

पिवि-सेचने- लट् हेतुमणिणच् सन्
प्र॰ ए॰ पिन्वति पिन्वयति–पिन्वयते पिपिन्विषति–
यङ् यङ् लुक्–
प्र॰ ए॰ पेपिन्व्यते पेपिन्वीति–पेपिन्ति

पक्ष-परिग्रहे- लट् हेतुमणिणच् सन्
प्र॰ ए॰ पक्षति– पक्षयति–पक्षयते पिपक्षिषति–
यङ् यङ् लुक्
प्र॰ ए॰ पापक्ष्यते पापक्षीति–पापक्ति

पूष-वृद्धौ- लट् हेतुमणिणच् सन् यङ्
प्र॰ ए॰ पूषति– पूषयति–पूषयते पुपूषिषति– पोपुष्यते
यङ् लुक्– पोपूषीति–पोपुष्टि–

पुष-पुष्टौ- लट् हेतुमणिणच् सन्
प्र॰ ए॰ पोषति– पोषयति–पोषयते पुपोषिषति–पुपुषिषति
यङ् यङ् लुक्
प्र॰ ए॰ पोपुष्यते– पोपुषीति–पोपोष्टि

प्रुषु-प्लुषु-दाहे- लट् हेतुमणिणच्
प्र॰ ए॰ प्रोषति–प्लोषति– प्रोषयति–ते–प्लोषयति–प्लोषयते
सन् यङ्
प्र॰ ए॰ पुप्रोषिषति–पुप्लोषिषति पोप्रुष्यते–पोप्लुष्यते
यङ् लुक्– पोप्रुषीति– पोप्रुष्यते– पोप्रुषीति– पोप्रोष्टि–
प्र॰ ए॰ पोप्लुषीति– पोप्लुष्यते– पोप्लुषीति– पोप्लोष्टि

पृषु-सेचने- लट् हेतुमणिणच् सन् यङ्
प्र॰ ए॰ पर्षति– पर्षयति–पर्षयते पिपर्षिषति परिपृष्यते
यङ् लुक्– परपृषीति–परिपृषीति–परीपृषीति–
परपृषितति–परिपृष्टि–परीपृष्टि–

पिस-पेसृ-गतौ- लट् हेतुमणिणच् सन् यङ्
प्र॰ ए॰ पेसति पेसयति–पेसये पिपेसिषति– पेपिस्यते
पिपिसिषति पेपेस्यते
यङ् लुक्– पेपिसीति–पेपेस्ति–
पेपेसीति–पेपेस्ति

पयँ-गतौ- लट् हेतुमणिणच् सन् यङ्
प्र· ए· पयति पययति-पययते पिपयिषति- पापय्यते

यङ् लुक्- पापयीति-पापत्ति

पोटृ-पर्याप्तौ- लट् हेतुमणिणच्- सन् यङ्
प्र· ए· प्रोथति- प्रोथयति-प्रोथयते पुप्रोथिषति पोप्रोथ्यते

यङ् लुक् पोप्रोथीति-पोप्रोत्थि-

पा-पाने-

लट्

	प्र·	म·	उ·
ए·	पिबति	पिबसि	पिबामि
द्वि·	पिबतः	पिबथः	पिबावः
ब·	पिबन्ति	पिबथ	पिबामः

लिट्

	प्र·	म·	उ·
ए·	पपौ	पपिथ-पपाथ	पपौ-
द्वि·	पपतुः	पपथुः	पपिव
ब·	पपुः	पप	पपिम

लुट

	प्र·	म·	उ·
ए·	पाता	पातासि	पातास्मि
द्वि·	पातारौ	पातास्थः	पातास्वः
ब·	पातारः	पातास्थ	पातास्मः

लृट्

	प्र·	म·	उ·
ए·	पास्यति	पास्यसि	पास्यामि
द्वि·	पास्यतः	पास्यथः	पास्यावः
ब·	पास्यन्ति	पास्यथ	पास्यामः

लोट्

	प्र·	म·	उ·
ए·	पिबतु-पिबतात्	पिब-पिबतात्	पिबानि
द्वि·	पिबतां	पिबतं	पिबाव
ब·	पिबन्तु	पिबत	पिबाम

लङ्

	प्र.	म.	उ.
ए.	अपिबत्	अपिबः	अपिबं
द्वि.	अपिबतां	अपिबतं	अपिबाव
ब.	अपिबन्	अपिबत	अपिबाम

विधिलिङ्

	प्र.	म.	उ.
ए.	पिबेत्	पिबेः	पिबेयं
द्वि.	पिबेतां	पिबेतं	पिबेव
ब.	पिबेयुः	पिबेत	पिबेम

आशीर्लिङ्

	प्र.	म.	उ.
ए.	पेयात्	पेयाः	पेयासं
द्वि.	पेयास्तां	पेयास्तं	पेयास्व
ब.	पेयासुः	पेयास्त	पेयास्म

लुङ्

	प्र.	म.	उ.
ए.	अपात्	अपाः	अपां
द्वि.	अपातां	अपातं	अपाव
ब.	अपुः	अपात	अपाम

लृङ्

	प्र.	म.	उ.
ए.	अपास्यत्	अपास्यः	अपास्यं
द्वि.	अपास्यतां	अपास्यतं	अपास्याव
ब.	अपास्यन्	अपास्यत	अपास्याम

पा–धातोर्हेतुमण्णिच्–लट् — लिट् — लुट्

प्र. ए. पाययति–पाययते — पाययामास — पाययिता

लृट् — लोट् — लङ्

प्र. ए. पाययिष्यति — पाययतु–पाययतात् — अपाययत्

विधिलिङ् — आशीर्लिङ् — लुङ् — लृङ्

प्र. ए. पाययेत् — पाय्यात् — अपीपत् — अपाययिष्यत्–अपाययिष्यत

पा–धातोः सन्–लट् पिपासति–

पा-धातोर्यङ्-लट् लिट् लुट् लृट्
प्र· ए· पेपीयते पेपीयांचक्रे पेपीयिता पेपीयिष्यते

लोट् लङ् लिङ् आशीर्लिङ्
प्र· ए· पेपीयतां अपेपीयत पेपीयेत पेपीयिषीष्ट

लुङ् अपेपीयिष्ट लृङ् अपेपीयिष्यत

पा-धातोर्यङ् लुक्-लट् लिट् लुट् लृट्
प्र· ए· पापेति-पापाति पापांचकार पापीता पापिष्यति

लोट् लङ्
प्र· ए· पापेतु-पापेतात्-पापातु-पापातात्- अपापेत-अपापात्

लिङ् आशीर्लिङ् लुङ् लृङ्
प्र· ए· पाप्यात् पापीयात् अपापासीत् अपापास्यत्

प्रथ-प्रख्याने- लट् हेतुमण्णिच् सन् यङ्
प्र· ए· प्रथति प्रथयति-प्रथयते पिप्रथिषति पाप्रथ्यते

यङ् लुक्- पाप्रथीति-पाप्रत्थि

पुल-महत्वे-लट् हेतुमण्णिच् सन्
प्र· ए· पोलति पोलयति-पोलयते पुपोलिषति-पुपुलिषति

यङ् यङ् लुक्-
प्र· ए· पोपुल्यते पोपुलीति-पोपोल्ति

पत्ल-गतौ- लट् हेतुमण्णिच् सन् यङ्
प्र· ए· पतति पातयति-पातयते पिपतिषति पनीपत्यते

यङ् लुक् पनीपतीति-पनीपत्ति-

पथे-गतौ- लट् हेतुमण्णिच् सन् यङ्
प्र· ए· पथति पाथयति-पाथयते पिपथिषति पापथ्यते

यङ् लुक् पापथीति-पापत्थि-

पै-शोषणे- लट्

	प्र·	म·	उ·
ए·	पायति	पायसि	पायामि
द्वि·	पायतः	पायथः	पायावः
ब·	पायन्ति	पायथ	पायामः

लिट् लुट् लृट्
प्र· ए· पपौ- पाता पास्यति-

लोट्

	प्र॰	म॰	उ॰
ए॰	पायतु–पायतात्	पाय–पायतात्	पायानि
द्वि॰	पायतां	पायतं	पायाव
ब॰	पायन्तु	पायत	पायाम

लङ्

	प्र॰	म॰	उ॰
ए॰	अपायत्	अपायः	अपायं
द्वि॰	अपायतां	अपायतं	अपायाव
ब॰	अपायन्	अपायात	अपायाम

विधिलिङ्

	प्र॰	म॰	उ॰
ए॰	पायेत्	पायेः	पायेयं
द्वि॰	पायेतां	पायेतं	पायेव
ब॰	पायेयुः	पायेत	पायेम

आशीर्लिङ्

	प्र॰	म॰	उ॰
ए॰	पायात्	पायाः	पायासं
द्वि॰	पायास्तां	पायास्तं	पायास्व
ब॰	पायासुः	पायास्त	पायास्म

लुङ्

	प्र॰	म॰	उ॰
ए॰	अपासीत्	अपासीः	अपासिषं
द्वि॰	अपासिष्टां	अपासिष्टं	अपासिष्व
ब॰	अपासिषुः	अपासिष्ट	अपासिष्म

लृङ्

	प्र॰	म॰	उ॰
ए॰	अपास्यत्	अपास्यः	अपास्यं
द्वि॰	अपास्यतां	अपास्यतं	अपास्याव
ब॰	अपास्यन्	अपास्यत	अपास्याम

पै–धातोर्हेतुमण्णिच्– लट् सन् यङ्

प्र॰ ए॰ पाययति–पाययते पिपासति पापायते

यङ् लुक्– पापेति–पापाति

डुपचष्-पाके-लट् पचति–

पॄ–पालनपूरणयोः– श्लुः लट्

	प्र॰	म॰	उ॰
ए॰	पिपर्ति	पिपर्षि	पिपर्मि
द्वि॰	पिपूर्तः	पिपूर्थः	पिपूर्वः
ब॰	पिपुरति	पिपूर्थ	पिपूर्मः

लिट्

	प्र॰	म॰	उ॰
ए॰	पिपार	पपरिथ	पपार–पपर
द्वि॰	पिप्रतुः–पपरतुः	पप्रथुः–पपरथुः	पप्रिव–पपरिव
ब॰	पप्रुः–पपरुः	पप्र–पपर	पप्रिम–पपरिम

लुट्

	प्र॰	म॰	उ॰
ए॰	परिता–परीता	परितासि–परीतासि	परितास्मि–परीतास्मि
द्वि॰	परितारौ–परीतारौ	परितास्थः–परीतास्थः	परितास्वः–परीतास्वः
ब॰	परितारः–परीतारः	परितास्थ–परीतास्थ	परितास्मः–परीतास्मः

लृट्

	प्र॰	म॰	उ॰
ए॰	परिष्यति–परीष्यति	परिष्यसि–परीष्यसि	परिष्यामि–परीष्यामि
द्वि॰	परिष्यतः–परीष्यतः	परिष्यथः–परीष्यथः	परिष्यावः–परीष्यावः
ब॰	परिष्यन्ति–परीष्यन्ति	परिष्यथ–परीष्यथ	परिष्यामः–परीष्यामः

लोट्

	प्र॰	म॰	उ॰
ए॰	पिपर्तु–पिपूर्तात्	पिपूर्हि–पिपूर्तात्	पिपराणि
द्वि॰	पिपुर्तां	पिपूर्तं	पिपराव
ब॰	पिपुरतुः	पिपूर्त	पिपराम

लङ्

	प्र॰	म॰	उ॰
ए॰	अपिपः	अपिपः	अपिपं
द्वि॰	अपिपूर्तां	अपिपूर्तं	अपिपूर्व
ब॰	अपिपरुः	अपिपूर्त	अपिपूर्म

विधिलिङ्

	प्र॰	म॰	उ॰
ए॰	पिपूर्यात्	पिपूर्याः	पिपूर्यां
द्वि॰	पिपूर्यातां	पिपूर्यातं	पिपूर्याव
ब॰	पिपूर्युः	पिपूर्यात	पिपूर्याम

आशीर्लिङ्

	प्र॰	म॰	उ॰
ए॰	पूर्यात्	पूर्याः	पूर्यासं
द्वि॰	पूर्यास्तां	पूर्यास्तं	पूर्यास्व
ब॰	पूर्यासुः	पूर्यास्त	पूर्यास्म

लुङ्

	प्र॰	म॰	उ॰
ए॰	अपारीत्	अपारीः	अपारिषं
द्वि॰	अपारिष्टां	अपारिष्टं	अपारिष्व
ब॰	अपारिषुः	अपारिष्ट	अपारिष्म

लृङ्

	प्र॰	म॰	उ॰
ए॰	अपरिष्यत्	अपरिष्यः	अपरिष्यं
द्वि॰	अपरिष्यतां	अपरिष्यतं	अपरिष्याव
ब॰	अपरिष्यन्	अपरिष्यत	अपरिष्याम

ह्रस्वांतोयमिति केचित्—पिप्रति—पिपृयात्—प्रियात्—अपार्षीत्—पाणिनीयमतेतंरोदसिपिपृमित्यादौछांदसत्वं

पुष-दाहे- श्यन् लट् लिट् लुट् लृट्
प्र॰ ए॰ प्लुष्यति— पुप्लोष प्लोषिता प्लोषिष्यति
लोट् लङ् लिङ् आशीर्लिङ्
प्र॰ ए॰ प्लुष्यतु—प्लुष्यतात् अप्लुष्यत् प्लुष्येत् प्लुष्यात्—
लुङ् लृङ्
प्र॰ ए॰ अप्लोषीत् अप्लोषिष्यत्

पुथ-हिंसायां- लट् पुथ्यति—

पुष्प-विकसने- लट् लिट् लुट् लृट्
प्र॰ ए॰ पुष्प्यति पुपुष्प पुष्पिता पुष्पिष्यति

पद-गतौ- लट् पद्यति— लिट्- पपाद

पुष–पुष्टौ– लट् पुष्यति– पुपोषिथ–पुपोष्ठ–पोष्ठा–अपुषत्

प्लुष–दाहे– लट् लिट् लुङ्
प्र॰ ए॰ प्लुष्यति– पुप्लोष– अप्लुषत्

प्युसीत्येके– प्युस्यति पुप्योस अप्युसत्

पृ–प्रीतौ– श्नुः–लट्– पृणोति

पृड–सुखने– शः लट् लिट् लुट् लृट् लुङ्
प्र॰ ए॰ पृडति पपर्ड पर्डिता पर्डिष्यत् अपर्डीत्

पृण–प्रीणने– लट् लिट् लुट् लुङ् लृङ्
प्र॰ ए॰ पृणति पपर्ण पर्णिता अपर्णीत् अपर्णिष्यत्

पुण–कर्मणिशुभे– लट् लिट् लुट् लुङ् लृङ्
प्र॰ ए॰ पुणति– पुपोण पोणिता अपोणीत् अपोणिष्यत्

पुर–अग्रगमने– लट् लिट् लुट् लुङ् लृङ्
प्र॰ ए॰ पुरति पुपोर पोरिता अपोरीत् अपोरिष्यत्

पुट–संश्लेषणे– लट् लिट् लुट् लुङ् लृङ्
प्र॰ ए॰ पुटति पुपोट पोटिता अपोटीत् अपोटिष्यत्

पुड–उत्सर्गे– लट् लिट् लृट् लुङ् लृङ्
प्र॰ ए॰ पुडति– पुपोड पोडिष्यति– अपुडत् अपोडिष्यत्

प्रच–ज्ञीप्सायां– लट् प्रच्छति– लिट्– पपृच्छ

पिश–अवयवे– लट् पिशति–

पि–गतौ– लट्– पियति–

प्रच्छ–ज्ञीप्सायां– लट् लिट् लुट् लृट् लुङ्
प्र॰ ए॰ पृच्छति पप्रच्छिथ पपृच्छ प्रक्ष्यति अप्राक्षीत्

पृ–पालनपूरणयोः श्ना लट् लिट् लुट्
प्र॰ ए॰ पृणाति पप्रतुः–पपरतुः परीता–परिता

प्ली–गतौ–प्लीनाति–

प्रुष–प्लुष–स्नेहनसेवनपूरणेषु–प्रुष्णाति– प्लुष्णाति

पुष–पुष्टौ– पुष्णाति

पीड–अवगाहने–स्वार्थणिच्– लट् लुङ्
प्र॰ ए॰ पीडयति अपीपिडत्–अपिपीडत्–

पॄ-पूरणे- लट् लिट्
प्र. ए. पारयति पारयांचकार

पक्ष-परिग्रहे- लट् लुट्
प्र. ए. पक्षयति पक्षयिता

प्रथ-प्रख्याने लट् लृट्
प्र. ए. प्रथयति प्रथयिष्यति

पृथ-प्रक्षेपे लट् लुङ्
प्र. ए. पर्थयति अपीपृथत्–अपपर्थत्–पथइत्येके

पुट-अल्पीभावे- लट् लोट् लुङ्
प्र. ए. पुटयति–पुटयते पुटयतु अपुपुटत्-अपुपुटत

पिजि-हिंसाबलातानिकेतनेषु- लट् लृङ्
प्र. ए. पिंजयति– अपिंजयिष्यत्

पिज-इतिकेचित् लट् लिट् लुट् लृट्
प्र. ए. पेजयति पेजयांचकार पेजयिता पेजयिष्यति

पिस-गतौ- लट् लोट् लङ् विधिलिङ् आशीर्लिङ्
प्र. ए. पेसयति– पेसयतां अपेसयत पेसयेत पेसयिषीष्ट

पथि-गतौ- लट् लुङ् लृङ्
प्र. ए. पंथयति अपपंथत् अपंथयिष्यत्

पिच्छ-कुट्टने- लट् लिट् लुङ्
प्र. ए. पिच्छयति पिच्छयांचकार अपिपिच्छत्

पुस्त-आदरानादरयोः- लट् लिट् लुट्
प्र. ए. पुस्तयति पुस्तयांचकार पुस्तयिता

पुल-महत्वे- लट् लृट् लोट् लङ्
प्र. ए. पोलयति पोलयिष्यति पोलयतां अपोलयत

पाल-रक्षणे- लट् विधिलिङ् आशीर्लिङ् लुङ्
प्र. ए. पालयति पालयेत पालयिषीष्ट अपीपलत्

पुट-संचूर्णने- लट् लुङ् लृङ्
प्र. ए. पोटयति अपूपुटत् अपोटयिष्यत्

पडि-नाशने- लट् लिट् लुट्
प्र. ए. पंडयति पंडयांचकार पंडयिता

पसि-नाशने- लट् लृट् लोट् लङ्
प्र. ए. पंसयति पंसयिष्यति पंसयतु अपंसयत्

पूल-संघाते- लट् विधिलिङ् लुङ्
प्र· ए· पूलयति पूलयेत अपूपुलत्-अपूपुलत

पुंस-अभिवर्धने- लट् लुङ्
प्र· ए· पुंसयति-पुंसयते अपुपुंसत्-अपुपुंसत-
लङ् अपुंसयिष्यत्-अपुंसयिष्यत

पूज-पूजायां- लट् लिट्
प्र· ए· पूजयति-पूजयते पूजयांचकार

पचि-विस्तारवचने-लट् लुट् लट्
प्र· ए· पंचयति-पंचयते पंचयिता पंचयिष्यति-पंचयिष्यते

पिडि-संघाते- लट् लोट् लङ्
प्र· ए· पिंडयति-पिंडयते पिंडयतु-पिंडयितात् अपिंडयत्-त

पल्यूल-लवनपवनयोः- लट् पल्यूलयति-पल्यूलयते

पार-कर्मसमाप्तौ-अपपारत्

पर्ण-हरितभावे- लट् लुङ् लृङ्
प्र· ए· पर्णयति-पर्णयते अपपर्णत् अपर्णयिष्यत्

कंड्वादि-पंपस्दुःखे-पंपस्यति

पयस्-प्रसृतौ-

अथ फकारादिपरस्मैपदानि।

फक्क-नीचैर्गतौ-शप्- लट् हेतुमणिणच् सन्
प्र· ए· फक्कति फक्कयति-फक्कयते पिफक्किषति

यङ् पाफक्यते- यङ् लुक्- पाफक्कीति-पाफक्ति-

ञि-फला-विशरणे शप्-लट् हेतुमणिणच्
प्र· ए· फलति फालयति-फालयते

सन् यङ् यङ् लुक्-
प्र· ए· पिफलिषति पाफल्यते पाफलीति-पाफल्ति

फल-निष्पत्तौ- लट् लिट् हेतुमणिणच् सन्
प्र· ए· फलति पफाल फालयति-फालयते पिफलिषति
द्वि· फेलतुः
ब· फेलुः

यङ् पाफल्यते- यङ् लुक्- पाफलीति-पाफल्ति-

फुल्ल—विकसने— लट् हेतुमण्णिच्— सन्
प्र॰ ए॰ फुल्लति फुल्लयति—फुल्लयते पुफुल्लिषति
यङ् पोफुल्य— यङ् लुक्— पोफुलीति—पोफुल्ति

फेल—गतौ— लट् हेतुमण्णिच् सन् यङ्
प्र॰ ए॰ फलति फेलयति—फेलयते पिफेलिषति पेफेल्यते
यङ् लुक्— पेफेलीति—पेफेल्ति

फण—गतौ— लट् लिट् प्र॰ म॰ उ॰
प्र॰ ए॰ फणति ए॰ पफाण फेणिथ पफाण—पफण
द्वि॰ फेणतुः फेणथुः फेणिव
ब॰ फेणुः— फेण फेणिम

हेतुमण्णिच् सन् यङ् यङ् लुक्—
प्र॰ ए॰ फेणयति—फेणयते— पिफणिषति पंफण्यते पंफणीति—पंफणित
फाणयति—फाणयते

अथ बकाराद्यात्मनेपदानि ।

बाध—विलोडने— लट् लिट् लुट् लृट्
प्र॰ ए॰ बाधते बबाधे बाधिता बाधिष्यते
लोट् लङ् लिङ् आशीर्लिङ् लुङ्
प्र॰ ए॰ बाधतां अबाधता बाधेत बाधिषीष्ट अबाधिष्ट
लृङ् अबाधिष्यत

बाड़—आप्लाव्ये लट् बाडते

बहि—वृद्धौ लट् बंहते— शेषंबडिधातुवत्

बर्ह—प्राधान्ये बर्हते शेषं गल्हाधातुवत्

बल्ह—प्राधान्ये बल्हते शेषं पूर्ववत्

बाहृ—प्रयत्ने बाहते शेषंद्राहृधातुवत्

उ॰ बुधिर्—बोधने— लट् लिट् लुट् लृट् लोट्
प्र॰ ए॰ बोधते बुबुधे बोधिता बोधिष्यते बोधतां
लङ् लिङ् आशीर्लिंङ् लुङ् लृङ्
प्र॰ ए॰ अबोधत बोधेत बोधिषीष्ट अबोधिष्ट अबोधिष्यत

उ· बुंदिर्-निशामने-लट् लिट् लुट् लृट् लोट्
प्र· ए· बुंदते बुबुंदे बुंदिता बुंदिष्यते बुंदतां
लङ् लिङ् आशीर्लिङ् लुङ् लृङ्
प्र· ए· अबुंदत बुंदेत बुंदिषीष्ट अबुंदिष्ट अबुंदिष्यत
अवशिष्टरूपाणिपूर्वोक्त धातुतुल्यानीत्यूह्यानि ॥

बधेश्चित्तविकारे- लट्
प्र· ए· बीभत्सते

बुध-अवगमने-श्यन् लट् बुध्यते

बध-बंधने-स्वार्थणिच् लट्- लिट् लुट् लृट्
प्र· ए· बंधयते बंधयांचक्रे बंधयिता बंधयिष्यते-

बुक्क-भाषणे- लट् लुङ् लृङ्
प्र· ए· बुक्कयते अबुक्कत अबुक्कयिष्यत

बृहि-भाषार्थः लट् लिट्
प्र· ए· बृंहयते बृंहयांचक्रे

बर्ह-भाषार्थः लट् लुङ् लृङ्
प्र· ए· बर्हयते अबिवर्हत अबर्हयिष्यत

बल्ह-भाषार्थः लट् लुङ् लृङ्
प्र· ए· बल्हयते अबिबल्हत अबल्हयिष्यत

बष्क-दर्शने-लट् बष्कयते-

अथ बकारादिपरस्मैपदानि ।

बद-स्थैर्ये-शप्- लट् लिट् द्विवचनं लुट् लृट्
प्र· ए· बदति बबाद बेदतुः बदिता बदिष्यति
लोट् लङ् विधिलिङ् आशीर्लिङ्
प्र· ए· बदतु-बदतात् अबदत् बदेत् बद्यात्
लुङ् अबादीत्-अबदीत् लृङ् अबदिष्यत्

बद-धातोर्हेतुमण्णिच्- लट् लिट्
प्र· ए· बादयति-बादयते बादयांचक्रे
लुट् लृट् लोट्
प्र· ए· बादयिता बादयिष्यति-बादयिष्यते बादयतु-बादयतात्
लङ् विधिलिङ् आशीर्लिङ्
प्र· ए· अबादयत्-अबादयत बादयेत्-बादयेत- बद्यात्-बादयिषीष्ट

लुङ् लृङ्
प्र॰ ए॰ अबीबदत् अबादयिष्यत्-अबादयिष्यत-

बद-धातोस्सन्- लट् लिट् लुट्
प्र॰ ए॰ बिबदिषति बिबदिषामास बिबदिषिता

लृट् लोट् लङ्
प्र॰ ए॰ बिबदिषिष्यति बिबदिषतु-बिबदिषतात् अबिबदिषत्

लिङ् आशीर्लिङ् लुङ् लृङ्
प्र॰ ए॰ बिबदिषेत् बिबदिष्यात् अबिबदिषीत् अबिबदिषिष्यत्

बद-धातोर्यङ् लट् लिट् लुट् लृट्
प्र॰ ए॰ बाबद्यते बाबदांचक्रे बाबदिता बाबदिष्यते

लोट्- लङ् लिङ्
बाबद्यतां अबाबद्यत बाबद्येत

आशीर्लिङ् लुङ् लृङ्
प्र॰ ए॰ बाबदिषीष्ट अबाबदिष्ट अबाबदिष्यत

बद-धातोर्यङ्लुक् लट् लिट् लुट्
प्र॰ ए॰ बाबदीति-बाबत्ति बाबदांचकार बाबदिता

लृट् लोट् लङ्
प्र॰ ए॰ बाबदिष्यति बाबदीतु-बाबतात्-बाबतु- अबाबदीत्
अबाबद्-त

लिङ् आशीर्लिङ् लुङ्
प्र॰ ए॰ बाबद्यात् बाबद्यात्-बाबद्यास्तां अबाबदीत्-

लृङ् अबाबदिष्यत्-

बिदि-अवयवे-शप्-लट् हेतुमणिणच् सन्
प्र॰ ए॰ बिंदति- बिंदयति-बिंदयते बिबिंदिषति

यङ् यङ् लुक्
प्र॰ ए॰ बेबिंद्यते बेबिंदीति-बेबिन्ति-बिदीतिपाठान्तरं

बुक्क-भषणे-शप् लट् हेतुमणिणच् सन्
प्र॰ ए॰ बुक्कति बुक्कयति-बुक्कयते बुबुक्किषति

यङ् यङ् लुक्-
प्र॰ ए॰ बोबुक्यते बोबुक्कीति-बोबुक्ति-

बिट-आक्रोशे- लट्- बिटति-

बुगि-वर्जने- लट् हेतुमण्णिच् सन् यङ्
प्र॰ ए॰ बुंगति- बुंगयति-बुंगयते बुबुंगिषति बोबुंग्यते
यङ् लुक्- बोबुंगीति-बोबुंक्ति-

बण-शब्दे- लट् हेतुमण्णिच् सन् यङ्
प्र॰ ए॰ बणति बाणयति-बाणयते बिबणिषति बाबण्यते
यङ् लुक्
प्र॰ ए॰ बंबणीति-बंबणित

बर्ब-गतौ- लट् हेतुमण्णिच् सन् यङ्
प्र॰ ए॰ बर्बति- बर्बयति-बर्बयते बिबर्बिषति बाबर्यते
यङ् लुक्- बाबर्बीति-बाबर्ति

बृह-वृद्धौ-लट् हेतुमण्णिच् सन् यङ्
प्र॰ ए॰ बर्हति- बर्हयति-बर्हयते बिबर्हिषति बरीबृह्यते-बरबृह्यते-
यङ् लुक्
प्र॰ ए॰ बरिबृहीति-बरबृहीति-बरीबृहीति-

बृहि-वृद्धौशब्देच- बृंहितंकरिगरितं लट् बृंहति-
हेतुमण्णिच् सन् यङ् यङ् लुक्
बृंहयति-बृंहयते बिबृंहिषति बरबृंह्यते बरबृंहीति-बरबृण्ढि

बृहिर-इत्येके- अबृहत्- अबर्हीत्-

बल-प्राणधारणे- लट् हेतुमण्णिच् सन्
प्र॰ ए॰ बलति बालयति-बालयते बिबलिषति
यङ् यङ् लुक्
प्र॰ ए॰ बाबल्यते बाबलीति-बाबल्ति

बुध-अवगमने- लट् हेतुमण्णिच् सन्
प्र॰ ए॰ बोधति बोधयति-बोधयते बुबोधिषति-बुबुधिषति
यङ् यङ् लुक्
प्र॰ ए॰ बोबुध्यते बोबुधीति-बोबुद्धि

बुधिर्-बोधने-अबुधत्-अबोधीत्

ब्रूञ्-व्यक्तायांवाचि- लट्

	प्र॰	म॰	उ॰
ए॰	आह-ब्रवीति-ब्रूते	आत्थ-ब्रवीषि-ब्रूषे	ब्रवीमि-ब्रुवे
द्वि॰	आहतुः-ब्रूतः-ब्रुवाते	आहथुः-ब्रूथः ब्रुवाथे	ब्रूवः-ब्रूवहे
ब॰	आहुः-ब्रुवन्ति-ब्रुवते	ब्रूथ- ब्रूध्वे	ब्रूमः-ब्रूमहे

लिट्

	प्र॰	म॰	उ॰
ए॰	उवाच–ऊचे	ऊवचिथ–उवक्थ–ऊचिषे–	उवाच–उवच–ऊचे
द्वि॰	ऊचतुः–ऊचाते	ऊचथुः–ऊचाथे–	ऊचिव–ऊचिवहे
ब॰	ऊचुः–ऊचिरे	ऊच–ऊचिध्वे	ऊचिम–ऊचिमहे

	लुट्	लृट्	लोट्	लङ्
प्र॰ ए॰	वक्ता	वक्ष्यति	ब्रवीतु–ब्रूतात्–ब्रूतां	अब्रवीत्–अब्रूत–

	विधिलिङ्	आशीर्लिङ्	लुङ्	लृङ्
प्र॰ ए॰	ब्रूयात्–ब्रवीत	उच्यात्–वक्षीत	उवोचत्–त	उवक्ष्यत्–त

बसु–स्तंभे–श्यन्– लट् लिट् लुट् लृट् लोट्

प्र॰ ए॰ बस्यति– बबास बसित बसिष्यति बस्यतु–तात्

बीस–प्रेरणे– लट् लिट् लुट् लुङ् लृङ्

प्र॰ ए॰ बिस्यति बिबेस बेसिता अबिसत् अबेसिष्यत्

बुस–उत्सर्गे– लट् लिट् लुङ्

प्र॰ ए॰ बुस्यति बुबोस अबुसत्– इतिश्यन्

बिल–भेदने–शः– लट् लिट् लुट् लृट् लोट्

प्र॰ ए॰ बिलति बिबेल बेलिता बेलिष्यति– बिलतु–बिलतात्–

बुड–संवरणे– लट् लिट लुट् लृट् लोट्

प्र॰ ए॰ ब्रुडति बुब्रोड ब्रोडिता ब्रोडिष्यति ब्रुडतु–ब्रुडतात्

बंध–बंधने–श्ना– लट् लिट् लुट् लृट्

प्र॰ ए॰ बध्नाति बबंधिथ–बबंद्ध बंद्धा बंत्स्यति

लोट् लङ्

प्र॰ ए॰ बंधान अबांत्सीत्–अबांद्धां–

बुध–संयमने– णिच्– लट्– बोधयति– बंधेति चांद्रः

बुस्त–आदरानादरयोः लट् बुस्तयति लिट् बुस्तयांचकार

बिल–भेदने– लट् लुट् लृट् लोट्

प्र॰ ए॰ बेलयति बेलयिता बेलयिष्यति बेलयतु–बेलयतात्

ब्रूस–हिंसायां– लट्– ब्रूसयति– लिट् ब्रूसयांचकार

बर्ह–हिंसायां– लट् लुङ् लृङ्

प्र॰ ए॰ बर्हयति अबिबर्हत् अबर्हयिष्यत्

बल–प्राणने– लट्– बलयति–

इति बकारादिपरस्मैपदानि ।

अथ भकारादिपरस्मैपदानि ।

भूसत्तायां— शप् लट्

	प्र.	म.	उ.
ए.	भवति	भवसि	भवामि
द्वि.	भवतः	भवथः	भवावः
ब.	भवन्ति	भवथ	भवामः

लिट्

	प्र.	म.	उ.
ए.	बभूव	बभूविथ	बभूव
द्वि.	बभूवतुः	बभूवथुः	बभूविव
ब.	बभूवुः	बभूव	बभूविम

लुट्

	प्र.	म.	उ.
ए.	भविता	भवितासि	भवितास्मि
द्वि.	भवितारौ	भवितास्थः	भवितास्वः
ब.	भवितारः	भवितास्थ	भवितास्मः

लृट्

	प्र.	म.	उ.
ए.	भविष्यति	भविष्यसि	भविष्यामि
द्वि.	भविष्यतः	भविष्यथः	भविष्यावः
ब.	भविष्यन्ति	भविष्यथ	भविष्यामः

लोट्

	प्र.	म.	उ.
ए.	भवतु—भवतात्	भव—भवतात्	भवानि
द्वि.	भवतां	भवतं	भवाव
ब.	भवन्तु	भवत	भवाम

लङ्

	प्र.	म.	उ.
ए.	अभवत्	अभवः	अभवं
द्वि.	अभवतां	अभवतं	अभवाव
ब.	अभवन्	अभवत	अभवाम

विधिलिङ्

	प्र॰	म॰	उ॰
ए॰	भवेत्	भवेः	भवेयं
द्वि॰	भवेतां	भवेतं	भवेव
ब॰	भवेयुः	भवेत	भवेम

आशीर्लिङ्

	प्र॰	म॰	उ॰
ए॰	भूयात्	भूयाः	भूयासं
द्वि॰	भूयास्तां	भूयास्तं	भूयास्व
ब॰	भूयासुः	भूयास्त	भूयास्म

लुङ्

	प्र॰	म॰	उ॰
ए॰	अभूत्	अभूः	अभूवं
द्वि॰	अभूतां	अभूतं	अभूव
ब॰	अभूवन्	अभूत	अभूम

लृङ्

	प्र॰	म॰	उ॰
ए॰	अभविष्यत्	अभविष्यः	अभविष्यं
द्वि॰	अभविष्यतां	अभविष्यतं	अभविष्याव
ब॰	अभविष्यन्	अभविष्यत	अभविष्याम

भू–धातोर्हेतुमण्णिच्–

लट्

	प्र॰	म॰	उ॰
ए॰	भावयति	भावयसि	भावयामि
द्वि॰	भावयतः	भावयथः	भावयावः
ब॰	भावयन्ति	भावयथ	भावयामः

लिट्

	प्र॰	म॰	उ॰
ए॰	भावयामास	भावयामासिथ	भावयामास
द्वि॰	भावयामासतुः	भावयामासथुः	भावयामासिव
ब॰	भावयामासुः	भावयामास	भावयामासिम

लुट्

	प्र॰	म॰	उ॰
ए॰	भावयिता	भावयितासि	भावयितास्मि

लुट्

	प्र·	म·	उ·
द्वि·	भावयितारौ	भावयितास्थः	भावयितास्वः
ब·	भावयितारः	भावयितास्थ	भावयितास्मः

लृट्

	प्र·	म·	उ·
ए·	भावयिष्यति	भावयिष्यसि	भावयिष्यामि
द्वि·	भावयिष्यतः	भावयिष्यथः	भावयिष्यावः
ब·	भावयिष्यन्ति	भावयिष्यथ	भावयिष्यामः

लोट्

	प्र·	म·	उ·
ए·	भावयतु-भावयतात्	भावय-भावयतात्	भावयानि
द्वि·	भावयतां	भावयतं	भावयाव
ब·	भावयन्तु	भावयत	भावयाम

लङ्

	प्र·	म·	उ·
ए·	अभावयत्	अभावयः	अभावयं
द्वि·	अभावयतां	अभावयतं	अभावयाव
ब·	अभावयन्	अभावयत	अभावयाम

विधिलिङ्

	प्र·	म·	उ·
ए·	भावयेत्	भावयेः	भावयेयं
द्वि·	भावयेतां	भावयेतं	भावयेव
ब·	भावयेयुः	भावयेत	भावयेम

आशीर्लिङ्

	प्र·	म·	उ·
ए·	भाव्यात्	भाव्याः	भाव्यासं
द्वि·	भाव्यास्तां	भाव्यास्तं	भाव्यास्व
ब·	भाव्यासुः	भाव्यास्त	भाव्यास्म

लुङ्

	प्र·	म·	उ·
ए·	अबीभवत्	अबीभवः	अबीभवं

लुङ्

	प्र॰	म॰	उ॰
द्वि॰	अभीभवतां	अभीभवतं	अभीभवाव
ब॰	अभीभवन्	अभीभवत	अभीभवाम

लृङ्

	प्र॰	म॰	उ॰
ए॰	अभावयिष्यत्	अभावयिष्यः	अभावयिष्यं
द्वि॰	अभावयिष्यतां	अभावयिष्यतं	अभावयिष्याव
ब॰	अभावयिष्यन्	अभावयिष्यत	अभावयिष्याम

भू-धातोस्सन्

लट्

	प्र॰	म॰	उ॰
ए॰	बुभूषति	बुभूषसि	बुभूषामि
द्वि॰	बुभूषतः	बुभूषथः	बुभूषावः
ब॰	बुभूषन्ति	बुभूषथ	बुभूषामः

	लिट्	लुट्	लृट्	लोट्
प्र॰ ए॰	बुभूषामास	बुभूषिता	बुभूषिष्यति	बुभूषतु—तात्

	लङ्	लिङ्	आशीर्लिङ्	लुङ्	लृङ्
प्र॰ ए॰	अबुभूषत्	बुभूषेत्	बुभूष्यात्	अबुभूषीत्	अबुभूषिष्यत्

भू-धातोर्यङ्

लट्

	प्र॰	म॰	उ॰
ए॰	बोभूयते	बोभूयसे	बोभूये
द्वि॰	बोभूयेते	बोभूयेथे	बोभूयावहे
ब॰	बोभूयन्ते	बोभूयध्वे	बोभूयामहे

लिट्

	प्र॰	म॰	उ॰
ए॰	बोभूयांचक्रे	बोभूयांचकृषे	बोभूयांचक्रे
द्वि॰	बोभूयांचक्राते	बोभूयांचक्राथे	बोभूयांचकृवहे
ब॰	बोभूयांचक्रिरे	बोभूयांचकृढ्वे	बोभूयांचकृमहे

लुट्

	प्र॰	म॰	उ॰
ए॰	बोभूयिता	बोभूयितासे	बोभूयिताहे
द्वि॰	बोभूयितारौ	बोभूयितासाथे	बोभूयितास्वहे
ब॰	बोभूयितारः	बोभूयिताध्वे	बोभूयितास्महे

लृट्

	प्र॰	म॰	उ॰
ए॰	बोभूयिष्यते	बोभूयिष्यसे	बोभूयिष्ये
द्वि॰	बोभूयिष्येते	बोभूयिष्येथे	बोभूयिष्यावहे
ब॰	बोभूयिष्यन्ते	बोभूयिष्यध्वे	बोभूयिष्यामहे

लोट्

	प्र॰	म॰	उ॰
ए॰	बोभूयतां	बोभूयस्व	बोभूयै
द्वि॰	बोभूयेतां	बोभूयेथां	बोभूयावहै
ब॰	बोभूयन्तां	बोभूयध्वं	बोभूयामहै

लङ्

	प्र॰	म॰	उ॰
ए॰	अबोभूयत	अबोभूयथाः	अबोभूये
द्वि॰	अबोभूयेतां	अबोभूयेथां	अबोभूयावहि
ब॰	अबोभूयन्त	अबोभूयध्वं	अबोभूयामहि

विधिलिङ्

	प्र॰	म॰	उ॰
ए॰	बोभूयेत	बोभूयेथाः	बोभूयेय
द्वि॰	बोभूयेयातां	बोभूयेयाथां	बोभूयेवहि
ब॰	बोभूयेरन्	बोभूयेध्वं	बोभूयेमहि

आशीर्लिङ्

	प्र॰	म॰	उ॰
ए॰	बोभूयिषीष्ट	बोभूयिषीष्ठाः	बोभूयिषीय
द्वि॰	बोभूयिषीयास्तां	बोभूयिषीयास्थां	बोभूयिषीवहि
ब॰	बोभूयिषीरन्	बोभूयिषीध्वं	बोभूयिषीमहि

लुङ्

	प्र॰	म॰	उ॰
ए॰	अबोभूयिष्ट	अबोभूयिष्ठाः	अबोभूयिषि
द्वि॰	अबोभूयिषातां	अबोभूयिषाथां	अबोभूयिष्वहि
ब॰	अबोभूयिषत	अबोभूयिढ्वं	अबोभूयिष्महि

लृङ्

	प्र॰	म॰	उ॰
ए॰	अबोभूयिष्यत	अबोभूयिष्यथाः	अबोभूयिष्ये

लङ्

	प्र·	म·	उ·
द्वि·	अबोभूयिष्येतां	अबोभूयिष्येथां	अबोभूयिष्यावहि
ब·	अबोभूयिष्यन्त	अबोभूयिष्यध्वं	अबोभूयिष्यामहि

भू-धातोर्यङ् लुक्

लट्

	प्र·	म·	उ·
ए·	बोभवीति—बोभोति	बोभवीषि—बोभोषि	बोभवीमि
द्वि·	बोभूतः	बोभूथः	बोभूवः
ब·	बोभवति	बोभूथ	बोभूमः

लिट्

	प्र·	म·	उ·
ए·	बोभवांचकार	बोभवांचकर्थ	बोभवांचकार-चकर
द्वि·	बोभवांचक्रतुः	बोभवांचक्रथुः	बोभवांचकृव
ब·	बोभवांचक्रुः	बोभवांचक्र	बोभवांचकृम

लुट्

	प्र·	म·	उ·
ए·	बोभविता	बोभवितासि	बोभवितास्मि
द्वि·	बोभवितारौ	बोभवितास्थः	बोभवितास्वः
ब·	बोभवितारः	बोभवितास्थ	बोभवितास्मः

लृट्

	प्र·	म·	उ·
ए·	बोभविष्यति	बोभविष्यसि	बोभविष्यामि
द्वि·	बोभविष्यतः	बोभविष्यथः	बोभविष्यावः
ब·	बोभविष्यन्ति	बोभविष्यथ	बोभविष्यामः

लोट्

	प्र·	म·	उ·
ए·	बोभवीतुः—बोभोतु—बोभूतात्	बोभूहि—बोभूतात्	बोभवानि
द्वि·	बोभूतां	बोभूतं	बोभवाव
ब·	बोभूवतु	बोभूत	बोभवाम

लङ्

	प्र·	म·	उ·
ए·	अबोभवीत्—अबोभोत्	अबोभवीः—अबोभोः	अबोभवं
द्वि·	अबोभूतां	अबोभूतं	अबोभूव
ब·	अबोभवुः	अबोभूत	अबोभूम

विधिलिङ्

	प्र॰	म॰	उ॰
ए॰	बोभूयात्	बोभूयाः	बोभूयां
द्वि॰	बोभूयातां	बोभूयातं	बोभूयाव
ब॰	बोभूयुः	बोभूयात	बोभूयाम

आशीर्लिङ्

	प्र॰	म॰	उ॰
ए॰	बोभूयात्	बोभूयाः	बोभूयासं
द्वि॰	बोभूयास्तां	बोभूयास्तं	बोभूयास्व
ब॰	बोभूयासुः	बोभूयास्त	बोभूयास्म

लुङ्

	प्र॰	म॰	उ॰
ए॰	अबोभूवीत्—अबोभूत्	अबोभूवीः—अबोभोः	अबोभूवं
द्वि॰	अबोभूतां	अबोभूतं	अबोभूव
ब॰	अबोभूवुः	अबोभूत	अबोभूम

लृङ्

	प्र॰	म॰	उ॰
ए॰	अबोभविष्यत्	अबोभविष्यः	अबोभविष्यं
द्वि॰	अबोभविष्यतां	अबोभविष्यतं	अबोभविष्याव
ब॰	अबोभविष्यन्	अबोभविष्यत	अबोभविष्याम

भिदि—अवयवे— लट् लिट् लुङ् लृङ्

प्र॰ ए॰ भिंदति बिभिंद अभिंदीत् अभिंदिष्यत्

भट—भृतौ— लट् लिट् लुट् लृट् लोट्

प्र॰ ए॰ भटति बभाट भटिता भटिष्यति भटतु—भटतात्

लङ् लिङ् आशीर्लिङ् लुङ् लृङ्

प्र॰ ए अभटत् भटेत् भट्यात् अभाटीत्—अभटीत् अभटिष्यत्—

भट—धातोर्हेतुमण्णिच् लट् लिट्

प्र॰ ए॰ भाटयति—भाटयते भाटयामास

लुट् लृट् लोट्

प्र॰ ए॰ भाटयिता भाटयिष्यति—भाटयिष्यते भाटयतु—भाटयतात्

लङ् लिङ्

प्र॰ ए॰ अभाटयत्—अभाटयत भाटयेत्—भाटयेत

आशीर्लिङ् लुङ् लृङ्

प्र॰ ए॰ भाट्यात्—भाटयिषीष्ट अबीभटत्—अबीभटत अभाटयिष्यत्

भट-धातोस्सन्- लट् लिट् लुट्
प्र· ए· बिभटिषति बिभटिषांचकार बिभटिषिता

लृट् लोट् लङ् लिङ्
प्र· ए· बिभटिषिष्यति बिभटिषतु अबिभटिषत् बिभटिषेत्

आशीर्लिङ् लुङ् लृङ्
प्र· ए· बिभटिष्यात् अबिभटिषीत् अबिभटिषिष्यत्

भट-धातोर्यङ्- लट् लिट् लुट् लृट्
प्र· ए· बाभट्यते बाभटांचक्रे बाभटिता बाभटिष्यते

लोट् लङ् लिङ् आशीर्लिङ्
प्र· ए· बाभट्यतां अबाभट्यत बाभट्येत बाभटिषीष्ट

लुङ् लृङ्
प्र· ए· अबाभटिष्ट अबाभटिष्यत—

भट-धातोर्यङ् लुक्- लट् लिट् लुट्
प्र· ए· बाभटीति—बाभट्टि बाभटांचकार बाभटिता

लृट् लोट्
प्र· ए· बाभटिष्यति बाभटीतु—बाभटितात्—बाभट्टा—बाभट्टात्

लङ् लिङ् आशीर्लिङ्
प्र· ए· अबाभटीत्—अबाभट् बाभट्यात् बाभट्यात्

लुङ् लृङ्
प्र· ए· अबाभटीत् अबाभटिष्यत्

भण-शब्दार्थः । लट् लिट् लुट् लृट् लोट्
प्र· ए· भणति बभाण भणिता भणिष्यति भणतु—भणतात्

लङ् लिङ् आशीर्लिङ् लुङ् लृङ्
प्र· ए· अभणत् भणेत् भण्यात् अभाणीत्—अभणीत् अभणिष्यत्

हेतुमण्णिच्- लट् सन् यङ् यङ् लुक्
प्र· ए· भाणयति—भाणयते बिभणिषति बाभण्यते बाभणीति—बाभंति

भ्रण-शब्दार्थः- लट् हेतुमण्णिच् सन्
प्र· ए· भ्रणति भ्राणयति—भ्राणयते बिभ्रणिषति

यङ् यङ् लुक्
प्र· ए· बाभ्रण्यते बाभ्रणीति—बाभ्रण्टि

भूष—अलंकारे— लट् हेतुमणिच् सन् यङ्
प्र· ए· भूषति भूषयति—भूषयते बुभूषिषति बोभूष्यते
यङ् लुक्— बोभूषीति—बोभूष्टि—

भष—भर्त्सने— लट् हेतुमणिच् सन्
प्र· ए· भषति भाषयति—भाषयते— बिभषिषति

यङ् यङ् लुक्
प्र· ए· बाभष्यते बाभषीति—बाभष्टि—

भट—परिभाषणे— लट् भटति—शेषंपूर्ववत्

भ्रमु—चलने—अवस्रंसनेच—

लट्

	प्र·	म·	उ·
ए·	भ्रमति—भ्रम्यति	भ्रमसि—भ्रम्यसि	भ्रमामि—भ्रम्यामि
द्वि·	भ्रमतः—भ्रम्यतः	भ्रथमः—भ्रम्यथः	भ्रमावः—भ्रम्यावः
ब·	भ्रमन्ति—भ्रम्यन्ति	भ्रमथ—भ्रम्यथ	भ्रमामः—भ्रम्यामः

लिट् लुट् लृट्
प्र· ए· बभ्राम भ्रमिता भ्रमिष्यति

लोट्

	प्र·	म·	उ·
ए·	भ्रमतु—भ्रमतात्	भ्रम—भ्रमतात्	भ्रमाणि
	भ्रम्यतु—भ्रम्यतात्	भ्रम्य—भ्रम्यतात्	भ्रम्याणि
द्वि·	भ्रमतां—भ्रम्यतां	भ्रमतं—भ्रम्यतं	भ्रमाव—भ्रम्याव—
ब·	भ्रमन्तु—भ्रम्यन्तु	भ्रमत—भ्रम्यत	भ्रमाम—भ्रम्याम—

लङ्

	प्र·	म·	उ·
ए·	अभ्रमत्—अभ्रम्यत्	अभ्रमः—अभ्रम्यः	अभ्रमं—अभ्रम्यं
द्वि·	अभ्रमतां—अभ्रम्यतां	अभ्रमतं—अभ्रम्यतं	अभ्रमव—अभ्रम्यव
ब·	अभ्रमन्—अभ्रम्यन्	अभ्रमत—अभ्रम्यत	अभ्रमम—अभ्रम्यम

विधिलिङ्

	प्र·	म·	उ·
ए·	भ्रमेत्—भ्रम्येत्	भ्रमेः—भ्रम्येः	भ्रमेयं—भ्रम्येयं
द्वि·	भ्रमेतां—भ्रम्येतां	भ्रमेत—भ्रम्येतं	भ्रमेव—भ्रम्येव
ब·	भ्रमेयुः—भ्रम्येयुः	भ्रमेत—भ्रम्येत	भ्रमेम—भ्रम्येम

आशीर्लिङ्

	प्र०	म०	उ०
ए०	भ्रम्यात्	भ्रम्याः	भ्रम्यासं
द्वि०	भ्रम्यास्तां	भ्रम्यास्तं	भ्रम्यास्व
ब०	भ्रम्यासुः	भ्रम्यास्त	भ्रम्यास्म

	लुङ्	लृङ्
प्र० ए०	अभ्रमीत्	अभ्रमिष्यत्

भ्रमु—चलने—इत्यस्माद्धेतुमण्णिच्—

	लट्	लिट्	लुट्	लृट्
प्र० ए०	भ्रामयति—भ्रामयते	भ्रामयामास	भ्रामयिता	भ्रामयिष्यति

	लोट्	लङ्
प्र० ए०	भ्रामयतु—भ्रामयतात्—भ्रामयतां	अभ्रामयत्—अभ्रामयत

	विधिलिङ्	आशीर्लिङ्	लुङ्	लृङ्
प्र० ए०	भ्रामयेत्—भ्रामयेत	भ्राम्यात्	अबिभ्रमत्—त	अभ्रमयिष्यत्

भ्रमु—धातोस्सन्—	लट्	यङ् लट्	यङ् लुक्
प्र० ए०	बिभ्रमिषति	बाभ्रम्यते	बाभ्रमीति—बाभ्रन्ति

उ० भेषृ—भये—शप्—	लट्	हेतुमण्णिच्	सन्
प्र० ए०	भेषति	भेषयति—भेषयते	बिभेषिषति

यङ् बेभेष्यते— यङ् लुक्— बेभेषीति—बेभेष्टि—

भेषृ—भ्लेषृ— भेषति—भ्लेषति—भेषयति—भेषयते—
विभेषिषति—बेभेष्यते—बेभेषीति—बेभेष्टि

भक्ष—भ्लक्ष—अदने— भक्षति—भ्लक्षति—भक्षयति—भक्षयते
विभक्षिषति—बाभक्ष्यते—बाभक्षीति—बाभष्टि
भक्षदितिमैत्रेयः—

भृञ्—भरणे—शप्	लट्	हेतुमण्णिच्
प्र० ए०	भरति—भरते	भारयति—भारयते

सन्	यङ्	यङ् लुक्
विभरिषति	बेभ्रीयते	बर्भर्ति—बर्भरीति

भजसेवायां—	लट्	हेतुमण्णिच्	सन्
प्र० ए०	भजति	भाजयति—भाजयते	बिभजिषति

यङ् बाभज्यते यङ् लुक् बाभजीति—बाभक्ति

लिट् प्रथम मध्यम

भक्ष्यति बभाज–भेजतुः भेजुः–भेजिथ–बभक्थ

लुङ् अभाक्षत्

भक्ष-भक्ष हसनयोः- लट् भक्षति–

भा-दीप्तौ- लुक् लट् भाति लुङ् अभासीत्

ञिभी-भयेश्लुः लट्

	प्र·	म·	उ·
ए·	बिभेति	बिभेषि	बिभेमि
द्वि·	बिभितः–बिभीतिः	बिभिथः–बिभीथः	बिभिवः–बिभीवः
ब·	बिभ्यति	बिभिथ–बिभीथ	बिभिमः–बिभीमः

लिट्

	प्र·	म·	उ·
ए·	बिभयांचकार	बिभयांचकर्थ–	बिभयांचकार–चकर
द्वि·	बिभयांचक्रतुः	बिभयांचक्रथुः	बिभयांचकृव
ब·	बिभयांचक्रुः	बिभयांचक्र	बिभयांचकृम
ए·	बिभाय	बिभयिथ–बिभेथ	बिभाय–बिभय
द्वि·	बिभ्यतुः	बिभ्यथुः	बिभ्यिव
ब·	बिभ्युः	बिभ्य	बिभ्यिम

लुट

	प्र·	म·	उ·
ए·	भेता	भेतासि	भेतास्मि
द्वि·	भेतारौ	भेतास्थः	भेतास्वः
ब·	भेतारः	भेतास्थ	भेतास्मः

लृट्

	प्र·	म·	उ·
ए·	भेष्यति	भेष्यसि	भेष्यामि
द्वि·	भेष्यतः	भेष्यथः	भेष्यावः
ब·	भेष्यन्ति	भेष्यथ	भेष्यामः

लोट्

	प्र·	म·	उ·
ए·	बिभेतु–बिभीतात्	बिभिहि–बिभीहि–बिभितात्	बिभयानि
द्वि·	बिभेतां–बिभीतां	बिभितं–बिभीतं	बिभयाव
ब·	बिभ्यतु–	बिभित–बिभीत	बिभयाम

लङ्

	प्र·	म·	उ·
ए·	अबिभेत्	अबिभेः	अबिभयं
द्वि·	अबिभितां–भी·	अबिभितं–भी·	अबिभीव–भिव
ब·	अबिभयुः	अबिभित	अबिभीमः–भिम

विधिलिङ्

	प्र	म·	उ·
ए·	बिभीयात्–भि·	बिभीयाः–भि·	बिभीयां–भि·
द्वि·	बिभीयातां–भि·	बिभीयातं–भि·	बिभीयाव–भि·
ब·	बिभीयुः–भि·	बिभीयात–भि·	बिभीयाम–भि·

आशीर्लिङ्

	प्र·	म·	उ·
ए·	भीयात्	भीयाः	भीयासं
द्वि·	भीयास्तां	भीयास्तं	भीयास्व
ब·	भीयासुः	भीयास्त	भीयास्म

लुङ्

	प्र·	म·	उ·
ए·	अभैषीत्	अभैषीः	अभैषं
द्वि·	अभैष्टां	अभैष्टं	अभैष्व
ब·	अभैषुः	अभैष्ट	अभैष्म

लृङ्

	प्र·	म·	उ·
ए·	अभेष्यत्	अभेष्यः	अभेष्यं
द्वि·	अभेष्यतां	अभेष्यतं	अभेष्याव
ब·	अभेष्यन्	अभेष्यत	अभेष्याम

उ० डु–भञ्–धारणपोषणयोः– लट् लिट्
बिभर्ति–बिभ्रति बिभार–बिभरामास

बिभृहि–बिभराणि–अबिभः–अभिभृतां–अबिभरुः
बिभृयात्–भ्रियात्–अभार्षीत्–आ० बिभृते–बिभ्राते–
बिभरांचक्रे–बभ्रे–भृषीष्ट–अभृत
भस–भर्त्सनदीप्त्योः ह्वा० बभस्ति–बब्धः भर्त्सति
भ्रमु–अनवस्थाने–अध्य श्यन्–भ्राम्यति–भ्रमति
लुङ् अभ्रमत्

भृश—अधः पतने— भृश्यति—बभर्श अभृशत्
भ्रंशु—अधः पतने— भृंश्यति
भृड—निमज्जने— भृड्युति

भुजोकौटिल्ये— लट् लिट् लुट् लृट् लोट्
प्र॰ ए॰ भुजति बुभोज भोक्ता भोक्ष्यति भुजतु—भुजतात्
लङ् विधिलिङ् आशीर्लिङ् लुङ्
प्र॰ ए॰ अभुजत् भुजेत् भुज्यात् अभौक्षीत्
लृङ् अभोक्ष्यत्— इत्याद्यूह्यानि

भुज—धातोर्हेतुमण्णिच्— लट् लुङ् लृङ्
प्र॰ ए॰ भोजयति अबुभुजत् अभोजयिष्यत्
भुज—धातोस्सन्— बुभुक्षति अबुभुक्षत् अबुभुक्ष्यत्
भुज—धातोर्यङ् बोभुज्यते अबोभुजिष्ट— अबोभुजिष्यत
भुज—धातोर्यङ् लुक्— बोभुजीति अबोभुजीत्— अबोभुजिष्यत्
बोभुक्ति—

भ्रस्ज—पाके—शः— भृज्जति— भृज्जते
भॄ—भर्त्सने—श्ना॰ भॄ—भृणाति— भरणेत्येके
भ्री—भये— लट् भृणाति भरणइत्येके
भक्ष—अदने लट् भक्षयति
अथस्वार्थणिच्— भडि—कल्याणे— लट् भंडति
भुवो—अवकल्कने—मिश्रकरणमित्येके—चिंतनमित्येके
भावयति
कंड्वादि—भिषज्—चिकित्सायां— भिषज्यति
भिष्णज्—उपसेवायां
भुरण—धारणपोषणयोः—भुरण्यः

अथ मकारादिपरस्मैपदं।

मंथ—विलोडने— लट् लिट् लुट् लृट्
प्र॰ ए॰ मंथति— ममंथ मंथिता मंथिष्यति
लोट् लङ् लिङ् आशीर्लिङ्
प्र॰ ए॰ मंथतु—मंथतात् अमंथत् मंथेत् मंथ्यात्
लुङ् अमंथीत् लृङ् अमंथिष्यत्

मंध–धातोर्हेतुमणिणच् लट् सन् यङ्
प्र॰ ए॰ मंधयति–मंधयते मिमंधिषति मामंध्यते
यङ् लुक् मामंधीति–मामंद्धि

मधि–हिंसासंक्लेशनयोः– शप् लट् हेतुमणिणच् लट्
प्र॰ ए॰ मंधति मंधयति
सन् यङ् यङ् लुक्
प्र॰ ए॰ मिमंधिषति मामंध्यते मामंधीति–मामंद्धि

मख–गत्यर्थः– लट् हेतुमणिणच् सन्
प्र॰ ए॰ मखति माखयति–माखयते मिमखिषति
यङ् यङ् लुक्
प्र॰ ए॰ मामख्यते मामखीति–मामखि

मखि–गत्यर्थः– लट् हेतुमणिणच् सन्
प्र॰ ए॰ मंखति मंखयति–मंखयते मिमंखिषति
यङ् यङ् लुक्
प्र॰ ए॰ मामंख्यते मामंखीति–मामखि

मगि–गत्यर्थः लट् मंगति–शेषं मखिधातुवत्

मघि–मंडने लट्– मंघति शेषं पूर्ववत्

मंचु–गत्यर्थः– लट् हेतुमणिणच् सन्
प्र॰ ए॰ मृंचति मंचयति–मृंचयते मिमृंचिषति
यङ् यङ् लुक्
मरीमृंजते मर्मृंच्यति–मरिमृंच्यति–मरीमृंच्यति–मर्मृक्ति

म्लुचु–गत्यर्थः–म्लुंचतीत्यादि–शेषं पूर्ववत्

मचु–म्लुचु–गत्यर्थौ– लट् हेतुमणिणच्
प्र॰ ए॰ मर्चति–म्लोचति मर्चयति–मर्चयते म्लोचयति–
सन् यङ्
मिमर्चिषति मरीमृच्यते
मिम्लोचिषति मोम्लुच्यते
मिम्लुचिषति मोम्लुचीति–मोमोक्ति
यङ् लुक्– मर्मृचीति–मरिमृचीति– मरीमृचीति–मर्मृक्ति

म्लेच्छ–अव्यक्ते शब्दे– लट् हेतुमणिणच् सन्
प्र॰ ए॰ म्लेच्छति म्लेच्छयति–म्लेच्छयते मिम्लेचिषति
यङ् यङ् लुक्
प्र॰ ए॰ मेम्लेच्यते मेम्लेच्छीति–मेम्लेक्ति–

मुर्छा–मोह–समुच्छ्राययोः	लट्	हेतुमण्णिच्	सन्
	प्र· ए· मूर्छति	मूर्छयति–मूर्छयते	मिमूर्छिषति
	यङ्	यङ् लुक्	
	प्र· ए· मोमूर्छ्यते	मोमूर्छीति–मोमोर्ति	
मुज–शब्दार्थः–	लट्	हेतुमण्णिच्	सन्
	प्र· ए· मोजति	मोजयति–मोजयते	मुमोजिषति–मुमुजिषति
	यङ्	यङ् लुक्	
	प्र· ए· मोमुज्यते	मोमुजीति–मोमोक्ति	
मुजि–शब्दार्थः–	लट्	हेतुमण्णिच्	सन्
	प्र· ए· मुंजति	मुंजयति–मुंजयते	मुमुंजिषति
	यङ्	यङ् लुक्	
	प्र· ए· मोमुंज्यते–	मोमुंजीति–मोमुङ्क्ति–	
म्लेट्ट–उन्मादे–	लट्	हेतुमण्णिच्	सन्
	प्र· ए· म्लेटति	म्लेटयति–म्लेटयते	मिम्लेटिषति
	यङ्	यङ् लुक्	
	प्र· ए· मिम्लेट्यते	मेम्लेटीति–मेम्लेट्टी	
मेड्र–उन्मादे–	लट्	हेतुमण्णिच्	सन्
	प्र· ए· म्रेडति	म्रेडयति–म्रेडयते	मिम्रेडिषति
	यङ्	यङ् लुक्	
	प्र· ए· मेम्रेड्यते	मेम्रेडीति–मेम्रेड्डि	
मेट्ट–उन्मादे	लट्	हेतुमण्णिच्	सन्
	प्र· ए· मेटति	मेटयति–मेटयते	मिमेटिषति
	यङ्	यङ् लुक्	
	प्र· ए· मेमेट्यते	मेमेटीति–मेमेट्टी–	
मडि–भूसायां–	लट्	हेतुमण्णिच्	सन्
	प्र· ए· मंडति	मंडयति–मंडयते–	मिमंडिषति
	यङ्	यङ् लुक्	
	प्र· ए· मामंड्यते	मामंडीति–मामंड्डि	
मुडि–मर्दने–	लट्	हेतुमण्णिच्	सन्
	प्र· ए· मुंडति	मुंडयति–मुंडयते	मुमुंडिषति–
	यङ्	यङ् लुक्	
	प्र· ए· मोमुंड्यते	मोमुंडीति–मोमुड्डि–	

मुडि–खंडने–पूर्ववत्

मठ–मदनिवासयोः–लट् हेतुमणिणच् सन्
प्र॰ ए॰ मठति– माठयति–माठयते मिमठिषति

यङ् यङ् लुक्
प्र॰ ए॰ मामठ्यते मामठीति–मामट्ठि

मर्ब–गतौ– लट् हेतुमणिणच् सन्
प्र॰ ए॰ मर्बति– मर्बयति–मर्बयते मिमर्बिषति–

यङ् यङ् लुक्
प्र॰ ए॰ मामर्ब्यते मामर्बीति–मामर्ब्रि

मण–शब्दार्थः– लट् हेतुमर्णिणच् सन्
प्र॰ ए॰ मणति माणयति–माणयते मिमणिषति

यङ् यङ् लुक्
प्र॰ ए॰ मंमण्यते ममणीति–ममणित

मीवृ–गतौ– लट् हेतुमणिणच सन्
प्र॰ ए॰ मीवति मीवयति–मीवयते मिमीविषति

यङ् यङ् लुक्
प्र॰ ए॰ मेमीव्यते मेमीलीति–मेमेति

मव्य–बंधने– लट् हेतुमर्णिणच् सन्
प्र॰ ए॰ मव्यति मव्ययति–मव्ययते मिमव्यिषति

यङ् मामव्यते–

मील–निमेषणे– लट् हेतुमणिणच् सन्
प्र॰ ए॰ मीलति मीलयति–मीलयते मिमीलिषति

यङ् यङ् लुक्
प्र॰ ए॰ मेमील्यते मेमीलीति–मेमील्ति

मूल–प्रतिष्ठायां– लट् हेतुमर्णिणच् सन्
प्र॰ ए॰ मूलति मूलयति–मूलयते मुमूलिषति

यङ् यङ् लुक्
प्र॰ ए॰ मोमूल्यते मोमूलीति–मोमूल्ति

मभ्र–गतौ– लट् हेतुमणिणच् सन्
प्र॰ ए॰ मभ्रति– मभ्रयति–मभ्रयते मिमभ्रिषति–

यङ् यङ् लुक्
प्र॰ ए॰ मामभ्र्यते मामभ्रीति–मामभ्रित

मीव-स्थौल्ये- लट् हेतुमण्णिच् सन्
प्र॰ ए॰ मीवति मीवयति-मीवयते मिमीविषति
यङ् यङ् लुक्
प्र॰ ए॰ मेमीव्यते मेमीवीति-मेमीति

मुर्वी-हिंसायां- लट् हेतुमण्णिच् सन्
प्र॰ ए॰ मूर्वति मूर्वयति-मूर्वयते मुमूर्विषति
यङ् यङ् लुक्
प्र॰ ए॰ मोमूर्व्यते मोमोर्वीति-मोमोर्ति

मर्वपूरणे- लट् हेतुमण्णिच् सन्
प्र॰ ए॰ मर्वति मर्वयति-मर्वयते मिमर्विषति
यङ् यङ् लुक्
प्र॰ ए॰ मामर्व्यते- मामर्वीति-मामर्ति-

मिवि-प्रीणने- लट् हेतुमण्णिच् सन्
प्र॰ ए॰ मिन्वति मिन्वयति-मिन्वयते मिमिन्विषति
यङ् यङ् लुक्
प्र॰ ए॰ मेमिन्व्यते- मेमिन्वीति-मेमेन्वित

मव-बंधने- लट् मवति-शेषं मणधातुवत्

मक्ष-कांक्षायां- माक्षि-कांक्षायां- मक्षति-मांक्षति

मृक्ष-संघाते-मृक्षति-म्रक्षेत्येके-म्रक्षति-शेषं मृचुधातुवत्

मूष-स्तेये-मूषयति-शेषं मूलवत्

मष-हिंसायां-मषति-शेषं मववत्

मिषु-सेचने-मेषति-शेषं बिटधातुवत्

मृषु-सेचने-मर्षति-शेषं बृहधातुवत्

मिमे-शब्दे-मिशति-शेषं मिषुधातुवत्

मश-शोषणेच्च-मशति-शेषं मषधातुवत्

मह-पूजायां-महति-शेषं पूर्ववत्

मद-मर्दने- लट् लिट् लुट् लृट्
प्र॰ ए॰ म्रदति मम्राद म्रदिता मृदिष्यति
लोट् लङ् विधिलिङ् आशीर्लिङ्
प्र॰ ए॰ म्रदतु-म्रदतात् अम्रदत् म्रदेत् म्रद्यात्

		लुङ्	लृङ्	हेतुमण्णिच्-लट्
प्र॰	ए॰	अम्रादीत्—अम्रदीत्	अम्रदिष्यत्	म्रादयति—म्रादयते

मदी—हर्ष गेपनयोः मदति—शेषमशवत्

मथे-विलोडने-		लट्	लिट्	लुट्	लृट्	लोट्
प्र॰	ए॰	मथति	ममाथ	मथिता	मथिष्यति	मथतु—मथतात्
		लङ्	लिङ्	आशीर्लिङ्	लुङ्	लृङ्
प्र॰	ए॰	अमथत्	मथेत्	मथ्यात्	अमथीत्	अमथिष्यत्
		णिच्	सन्	यङ्	यङ् लुक्	
ए॰	ए॰	माथयति	मिमथिषति	मामथ्यते	मामथीति—मामद्धि	

म्लै-हर्षक्षये-		लट्	लिट्	लुट्	लृट्	लोट्
प्र॰	ए॰	म्लायति	मम्लौ	म्लाता	म्लास्यति	म्लायतु—तात्
		लङ्	लिङ्	आशीर्लिङ्	लुङ्	लृङ्
प्र॰	ए॰	अम्लायत्	म्लायेत्	म्लायात्	अम्लासीत्	अम्लास्यत्

म्ना-आदाने		लट्	लिट्	लुट्	लृट्	लोट्
प्र॰	ए॰	मनति	मम्नौ	म्नाता	म्नास्यति	मनतु—मनतात्
		लङ्	लिङ्	आशीर्लिङ्	लुङ्	लृङ्
प्र॰	ए॰	अमनत्	मनेत्	म्नायात्	अम्नासीत्	अम्नास्यत्

मिहसेचने-		लट्	लिट्	लुट्	लुङ्
प्र॰	ए॰	मेहति	मिमेहिथ—मिमेथ	मेढा	अमिक्षत्

इति शप्

मा-माने-		लट्	लिट्	लुट्	लृट्	लट्	लङ्
प्र॰	ए॰	माति	ममौ	माता	मास्यति	मातु	अमात्
		लिङ्	आशीर्लिङ्	लुङ्	लृङ्		
प्र॰	ए॰	मायात्	मेयात्	अमासीत्	अमास्यत्		
		मायातां	मेयास्तां				

मजू-शुद्धौ लुक् लट्

	प्र॰	म॰	उ॰
ए॰	मार्ष्टि—	मार्क्षि	मार्ज्मि
द्वि॰	मृष्टः—	मृष्ठः	मृज्वः
ब॰	मृजन्ति—मार्जन्ति	मृष्ठ	मृज्मः

लिट्

	प्र॰	म॰	उ॰
ए॰	ममार्ज	ममार्जिथ—ममार्ष्ठ	ममार्ज
द्वि॰	ममार्जतुः—ममृजतुः	ममार्जिथुः—ममृजिथुः	ममार्जिव—ममृज्व
ब॰	ममार्जुः—ममृजुः	ममार्ज—ममृज	ममार्जिम—ममृज्म

लुट्

	प्र॰	म॰	उ॰
ए॰	मार्जिता—मार्ष्टा	मार्जितासि—मार्ष्टासि	मार्जितास्मि-मार्ष्टास्मि
द्वि॰	मार्जितारौ-मार्ष्टारौ	मार्जितास्थः-मार्ष्टास्थः	मार्जितास्वः-मार्ष्टास्वः
ब॰	मार्जितारः-मार्ष्टारः	मार्जितास्थ-मार्ष्टास्थ	मार्जितास्मः-मार्ष्टास्मः

लृट्

	प्र॰	म॰	उ॰
ए॰	मार्जिष्यति—मार्क्ष्यति	मार्जिष्यसि—मार्क्ष्यसि	मार्जिष्यामि—मार्क्ष्यामि
द्वि॰	मार्जिष्यतः—मार्क्ष्यतः	मार्जिष्यथः—मार्क्ष्यथः	मार्जिष्यावः—मार्क्ष्यावः
ब॰	मार्जिष्यन्ति-मार्क्ष्यन्ति	मार्जिष्यथ—मार्क्ष्यथ	मार्जिष्यामः—मार्क्ष्यामः

लोट्

	प्र॰	म॰	उ॰
ए॰	मार्ष्टु—मृष्टात्	मृड्ढि—मृष्टात्	मार्जानि
द्वि॰	मृष्टां	मृष्टं—	मार्जाव
ब॰	मृजन्तु—मार्जन्तु	मृष्ट	मार्जाम

लङ्

	प्र॰	म॰	उ॰
ए॰	अमार्ट—अमार्ड	अमार्ट—अमार्ड	अमार्जं
द्वि॰	अमृष्टां	अमृष्टं	अमृज्व
ब॰	अमार्जन्	अमृष्ट	अमृज्म

लिङ्

	प्र॰	म॰	उ॰
ए॰	मृज्यात्	मृज्याः	मृज्यां
द्वि॰	मृज्यातां	मृज्यातं	मृज्याव
ब॰	मृज्युः	मृज्यात	मृज्याम

आशीर्लिङ्

	प्र॰	म॰	उ॰
ए॰	मृज्यात्	मृज्याः	मृज्यासं

आशीर्लिङ्

	प्र०	म०	उ०
द्वि०	मृज्यास्तां	मृज्यास्तं	मृज्यास्व
ब०	मृज्यासुः	मृज्यास्त	मृज्यास्म

लुङ्

	प्र०	म०	उ०
ए०	अमार्जीत्–अमार्क्षीत्	अमार्क्षीः–अमार्जीः	अमार्जिषं–अमार्क्षं
द्वि०	अमार्जिष्टां–अमार्ष्टां	अमार्जिष्टं–अमार्जिष्टं	अमार्जिष्व–अमार्क्ष्व
ब०	अमार्जिषुः–अमार्क्षुः	अमार्जिष्ट–अमार्जिष्ट	अमार्जिष्म–अमार्क्ष्म

लृङ्

	प्र०	म०	उ०
ए०	अमार्जिष्यत्–अमार्क्ष्यत्	अमार्जिष्यः–अमार्क्ष्यः	अमार्जिष्यं–क्ष्यं
द्वि०	अमार्जिष्यतां-अमार्क्ष्यतां	अमार्जिष्यतं-अमार्क्ष्यतं	अमार्जिष्याव-क्ष्याव
ब०	अमार्जिष्यन्–अमार्क्ष्यन्	अमार्जिष्यत-अमार्क्ष्यत	अमार्जिष्याम-क्ष्याम

मुह–वैचित्ये– श्यन्

	लट्	लिट्	लुट्	लृट्
प्र० ए०	मुह्यति	मुमोहिथ	मोग्ध	मोहिष्यति
		मुमोग्धं	मोहिता	मोक्ष्यति
		मुमोग्ध	मोढा	

लुङ्	लृङ्
अमुहत्	अमोहिष्यत्–अमोक्ष्यत्

मदी–हर्षे– लट् माद्यति लुङ् अमदेत

मुस–खंडने– लट् मुस्यति लुङ् अमुसत्

मसी–परिणामे– लट् मस्यति लुङ् अमसत् समीत्येके

ञिमिदा–स्नेहने लट् मेद्यति लुङ् अमिदत्

मृष–तितिक्षायां लट् मृष्यति लिट् ममर्ष–

डुमिञ्–प्रक्षेपणे–श्नुः लट् लिट्

प्र० ए० मिनोति–मिनुते ममौ–मिम्यतुः

म० ममिथ–ममाथ–मिम्युः

उ० मिम्ये

	लुट्	आशीर्लिङ्	लुङ्
प्र० ए०	माता	मीयात्	अमासीत्–अमासिष्टां

मिच्छ–उत्क्लेशे–शः लट् लिट् लुङ्

प्र० ए० मिच्छति मिमिच्छ अमिच्छीत्

मड-सुखने- लट्
प्र· ए· मृडति-

मण-हिंसायां- लट् लिट् लुट् लट् लोट्
प्र· ए· मृणति ममर्ण मर्णिता मर्णिष्यति मर्णतु-तात्

लङ् लिङ् आशीर्लिङ् लुङ् लङ्
प्र· ए· अमृणत् मृणेत् मृण्यात् अमर्णीत् अमर्णिष्यत्

मुण-प्रतिज्ञाने- लट् लिट् लुट् लट् लोट्
प्र· ए· मुणति मुमोण मोणिता मोणिष्यति मोणतु-मोणतात्

मुर-संवेष्टने लट् लिट् लुट् लुङ्
प्र· ए· मुरति मुमोर मोरिता अमोरीत्

मिष-स्पर्धायां लट् लिट् लुट् लट् लोट्
प्र· ए· मिषति मिमेष मेषिता मेषिष्यति मिषतु-मिषतात्

मिल-संश्लेषणे- लट् लिट् लुट् लट् लोट्
प्र· ए· मिलति मिमेल मेलिता मेलिष्यति मिलतु-तात्

मुट-आक्षेपमर्दनयोः- लट् लट् लोट् लङ्
प्र· ए· मुटति मोटिष्यति मुटतु-तात् अमुटत्

ट्-मस्जो-शुद्धौ- लट् लिट् म· लुट् लट्
प्र· ए· मज्जति ममज्ज ममजक्थ-ममज्जथ मंक्त मंक्ष्यति

लुङ् अमांक्षीत्-अमाक्षुः ।

मश-आमर्शने-आमर्शसंस्पर्शः-

लट् लिट् लुङ्
प्र· ए· मृशति ममर्श अम्राक्षीत्-अमार्क्षीत्-अमृक्षत्

मृ-हिंसायां-श्ना- लट् लुट् लट्
प्र· ए· मृणाति मरिता-मरीता मरिष्यति-मरीष्यति

मंथ-विलोडने- लट् आशीर्लिङ् लुङ् लङ्
प्र· ए· मथ्नाति मथ्यात् अमंथीत् अमंथिष्यत्

मद-रोधे लट् द्वि· ब· लिट् लुट् लट्
प्र· ए· मृध्नाति मृध्नीतः मृध्नन्ति ममर्ध मर्धिता मर्धिष्यति

मड-च- लट् लिट् लुङ् लङ्
प्र॰ ए॰ मृड्नाति मृड्नातु-मृड्नीतात् अमृड्णात् मृड्णीयात्

मुष-स्तेये- लट् लुट् लुङ् लङ्
प्र॰ ए॰ मुष्णाति- मोषिता अमोषीत् अमोषिष्यत्

मिदि-स्नेहने-स्वार्थणिच्- लट् लिट् लुट् लृट्
प्र॰ ए॰ मिंदयति मिंदयांचकार मिंदयिता मिंदयिष्यति

लोट् लङ् लिङ्
